कविकल्पलता

A book from

the collection of

ശ്രീ നീലകണ്ഠ തീർത്ഥപാദസ്വാമികൾ

Digitized by

Chattampi Swami Archive Trust

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE

विज्ञापनम् ।

एतत्प्राचीनमलङ्कारशास्त्रं मालवाधीश्वरमहामात्येन श्रीमद्वाग्भटसूनुना देवेश्वरेण सुललितसंस्कृतभाषया विरचितम्। पुस्तिकेयं ग्रन्थकृता चतुः-पञ्च-षट्-सप्त क्रमेण द्वाविंशतिकुसुमविभूषित चतुःस्तवकविराजिता लतेव परिकल्पिता। आलोच्यैतामल्पेनाप्यायासेन मुग्धानामपि कवित्वं जायते का कथा पण्डितानाम्। एतादृशीमुपकारितामवलोक्य भविष्यत्यस्या अभावो मा भूदित्यनुध्याय चास्माभिरेषा यत्नेन मुद्रापिता प्रकाशिता च। यद्यधुनानया पाठकानां कवित्वप्रेप्सूनां काचिदुपकृतिर्भवेत्तदास्माकं सफलो यत्नोऽर्थव्ययश्चेत्यलम्।

श्रीरामगोपाल शर्मणः ।

कलिकाता

शकाब्दाः १८१५

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE

कविकल्पलतायाः सूचीपत्रम् ।

विषयः ।	पत्राङ्कः ।
मङ्गलाचरणम्	१
शब्दस्तवके छन्दोऽभ्यासः ...	१
„ सामान्यशब्दः ...	४
„ वर्णस्थितिः	१२
„ अनुप्रासः	१७
श्लेषस्तवके उद्दिष्टवर्णनम् ...	२०
„ वर्ण्यवर्णनम् ...	२४
„ प्रकीर्णम् ...	२७
„ संख्या ...	३५
„ रूढियौगिकमिश्राः ...	३८
कथास्तवके राजदर्शनम् ...	३९
„ गङ्गास्तुतिः ...	४४
„ भगवत्पादानुभाषणम् ...	४८
„ विप्रसम्भाषणम् ...	४८
„ तडागादिवर्णनम् ...	५२
„ वादितर्जनम् ...	५३
अर्थस्तवके अर्थोत्पादनम् ...	५५
„ अद्भुतम् ...	५७
„ चित्रम् ...	६०
„ सादृश्यम् ...	६८
„ रूपकादिकम् ...	७०
„ समस्यापूरणोपायः ...	७३
„ समस्याः ...	८२

इति सूचीपत्रं समाप्तम् ।

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE

कविकल्पलता।

गङ्गावारिभिरुक्षिताः फणिफणैरुत्पल्लवास्तच्छिखाः
रत्नैः कोरकिताः सितांशुकलया स्मेरैकपुष्पश्रियः।
आनन्दाम्बुपरिप्लुताच्चिहुतभुग्धूमैर्मिलद्दोहदा
नाल्पं कल्पलताः फलं ददतु वोऽभीष्टं जटा धूर्जटेः॥

मालवेन्द्रमहामात्यः श्रीमद्वाग्भटनन्दनः।
देवेश्वरः प्रतनुते कविकल्पलतामिमाम्॥

प्रतिभा-भावितात्मानः कवित्वं के न कुर्व्वते।
अन्ये तु कविताधानकुशला विरला: पुनः॥

यदन्यैर्वन्यैर्न क्षुण्णं तत्र सञ्चरतो मम।
पदे पदे प्रस्खलतः सन्तः सन्त्ववलम्बनम्॥

कविशिक्षाशतं वीक्ष्य कवीन्द्रानुपजीव्य च।
निबद्धेयं मया धीरास्त्वरितश्लोकसिद्धये॥

सुवृत्तरम्यस्तवका सदालिपरिशीलिता।
कविकल्पलताख्येयं कविशिक्षा निषेव्यताम्॥

शब्द-श्लेष-कथार्थाख्याश्चत्वारः स्तवका इह।
ते चतुः-पञ्च-षट्-सप्त-कुसुमैरन्विताः क्रमात्॥

तत्राद्यस्तवके छन्दोऽभ्यासः सामान्यशब्दकाः।
वर्णस्थितिरनुप्रासः कुसुमानि यथाक्रमम्॥

अथ शब्दस्तवके छन्दोऽभ्यासः।

छन्दोऽभ्यासप्रसूनेऽत्र नेत्रभूता विपश्चिताम्।
कथ्यन्ते केऽपि शब्दा यैश्छन्दो मन्दोऽपि विन्दति॥

CHATTAMPI SWAMI ARCHIVE

श्रीर्लक्ष्मीः कमला पद्मालया च हरिवल्लभा।
दुग्धाब्धितनया क्षीरसागरापत्यमित्यपि॥
क्षीरपाथोधितनयेत्येवमेकाक्षरादिकम्॥
आदौ साध्यं पदं स्थाप्यं शेषं कुर्याद्विशेषणैः।
विशेष्यार्थो वर्णाकाराधाराधेयक्रियागुणैः।
सादृश्यपरिवाराद्यैः क्रियेत सविशेषणः॥

यथा सुधांशुर्धवलोऽतिवृत्तः कान्तान्तरिक्षो हरिणं दधानः।
महत्तमोघ्नन् जनतापहारी मृगेन्द्रवद्राजति ऋक्षमध्ये॥

"बन्धुश्चौरः सुहृद् वादी कल्पः प्रख्यः प्रभः समः।
देशीय-देश्य-विप्राभाः सोदराद्या इवार्थकाः॥
यथेन्दुबन्धु र्मुक्ता-श्री-चौरो हार-श्रियः सुहृत्।
कुन्दवादी हंसकल्पः क्षीरप्रख्यो हिमप्रभः॥
गङ्गासमोऽब्जदेशीयः शेषदेश्यः सुधारिपुः।
विषाभस्ते यशोराशिः कैलासोदरसोदरः॥ "

कथानगरसर्वार्थनित्यकृत्यादिवर्णनैः।
लोकानां दृष्टचेष्टाभिश्छन्दोऽभ्यासक्रमो यथा॥
आसीद्दशरथो राजा चत्वारस्तस्य सूनवः।
राम-लक्ष्मण-भरत-शत्रुघ्नाश्चेति विश्रुताः॥
ध्वस्तध्वान्तभरं रत्नवेश्मविस्फाररश्मिभिः।
राजधानी दिनस्येव तत्पुरं द्योतते सदा॥
स्थाली भात्यन्नपूर्णेयमर्णोभिः शोभते घटः।
पटः संलक्ष्यते सूक्ष्मः साक्षाल्लक्ष्मीरियं वधूः॥
प्रातः कृतश्रमः स्नातोऽर्चितदेवो हुतानलः।
भुक्तान्नः श्रुतसच्छास्त्रः सायं शय्यागृहं ययौ॥
पुष्पाणि पाणिदेशेऽसौ कृत्वा क्रीडति कामुकः।
ताम्बलिकोऽत्र ताम्बूलमस्य पश्चार्पयत्यसौ॥

CHATTAMPI SWAMI ARCHIVE

तदर्थान्यपदैश्चान्यश्लोकस्य परिवर्त्तनात्।
तत्रैव छन्दस्यभ्यस्येदथ छन्दोऽन्तरे यथा॥
प्रत्यर्थिपृथिवीपाल तमोजालदिवाकरः।
नीतिप्रतितिपथ्यैन्यो राजते पृथिवीपतिः॥
प्रत्यनीकावनीकान्तध्वान्तविध्वंसनांशुमान्।
नयवल्लीनवाम्भोदः शोभते भूमिवल्लभः॥
प्रत्यर्थिपृथ्वीहृदयाधिनाथध्वान्तौघविध्वंसनवासरेशः।
सन्नीतिवल्लीनववारिवाहो विश्वम्भराया दयितो विभाति॥
दुर्धरारिधरणीधरोद्धतध्वान्तमण्डलविखण्डनांशुमान्।
नीतिवल्लीनवनूतनाम्बुदो मेदिनीपरिवृढोऽधिराजते॥
"यतिभङ्गो नामधातुभागभेदे भवेत् यथा।
पुनातु नरकारिश्चक्रभूषित-कराम्बुजः॥
दिविषद्वृन्दवन्द्यं वन्दे गोविन्दपदाम्बुजम्॥
स्वरसन्धौ तु न श्रीशोऽस्तु भूत्यै भवतो यथा॥
न स्यादिविभक्तिभेदे भात्येष राजेति कुत्रचित्।
क्वचित्तु स्याद् यथा देवाय नमश्चन्द्रमौलये॥
चादयो न प्रयोक्तव्या विच्छेदात् परतो यथा।
नमः शिवाय कृष्णाय च दानवविनाशिने॥
एकस्वरोपसर्गेण विच्छेदः श्रुतिसौख्यकृत्।
यथा पिनाकपाणिं प्रणमामि स्मरनाशनम्॥ "
एवं यथायथोद्वेगः सुधियां नोपजायते।
तथा तथा मधुरतानिमित्तं यतिरिष्यते॥
अवद्यार्थापि मधुरा मनो हरति भारती।
तमोनिचयशङ्काशा मञ्जुला देवकोकिलाः॥
इति शब्दस्तवके छन्दोऽभ्यासो नाम प्रथमं कुसुमम्।

CHATTAMPI SWAMI ARCHIVE

अथ शब्दस्तवके सामान्यशब्दः।

सामान्यशब्दाः कथ्यन्ते क्रमादेकाक्षरादयः।
श्री भो हे हि नु निः सं नि प्र वि प्राक् द्राक् सुसद् यथा॥
श्रीकृष्ण भोः केशव हे हरे द्राङ्ङ्घ्रीड़ितारे सुमतिं प्रयच्छ।
निकाममासेव्य विभासि नु त्वं सद्योगिनां चेतसि सङ्गतो हि॥

इत्येकाक्षरम्।

स्फुटं स्फूर्यत् स्फुरत् स्फारं सारं तारं वरं परम्।
प्रायंश प्राज्यं प्रियं प्रेष्ठं ज्येष्ठं श्रेष्ठं मुहुर्बहु॥
कौत्र्यं काम्यं कम्रं कान्तं मञ्जु मंजु महन् मिलत्।
वाढ़ं गाढ़ं दृढ़ं प्रौढ़ं वल्गु वलात् ललत् लसत्॥
स्वैरं सम्यक् सदा शश्वत् सत्यं नित्यं ध्रुवं द्रुतम्।
धृर्य्यं वर्य्यं पुनः प्रायः सुष्ठु सद्यो भृशं लसत्॥
ननु नाम किल क्रीड़त् चञ्चत् चारु जवात् खलु।
श्रीमत् प्रोच्चैः शनैर्मोद्यत् रिङ्गद्राजच्चिरं परि॥

इति द्व्यक्षरम्।

झटिति प्रकटं सपदि प्रसभं निविड़ं सुभगं सुचिरं प्रवरम।
विहसद्विकसद् विलसद् विचरद् विमलं सकलं बहुलं प्रवलम्॥
सर्वदा सर्वथा सर्वतः शोभतः सत्वरं सन्ततं निश्चितं वेगतः।
उच्चकैरञ्जसा नित्यशः सुन्दरं पेशलं मञ्जुलं प्रोल्लसत् विस्फुरत्॥
प्रोद्दामद् विभ्राजदुत्तुङ्गद् विस्फूर्ज-
दुत्तान शोभाढ्य विस्फार विक्रीड़त्।
सच्छाय सच्छोभ निःशङ्क निःशेष-
मित्यं बुधैस्त्र्यक्षराणि प्रयोज्यानि॥

इति त्र्यक्षरम्।

मनोरमं मनोहरं समन्ततः समीहितम्।
वरद्युतिं स्फुरत्प्रभं महोज्ज्वलं ज्वलच्छवि॥

CHATTAMPI SWAMI ARCHIVE

रयादेव जयादेव सर्वकालं सुनिश्चितम् ।
स्फारशोभं प्रभायुक्तं स्फुरच्छायं श्रियान्वितम् ॥
वराभोगं वरश्रीकं लसत्कान्ति स्फुरद्यशः ।
घनच्छायं झटित्येव शोभायुक्तं विकस्वरम् ॥

इति चतुरक्षरम् ।

प्रवरश्रीकं रुचिरच्छायं स्फुटलक्ष्मीकं बहुलश्रीमत् ।
कलया युक्तं विलसद्रोचिः प्रचुरज्योतिर्द्युतिरोचिष्णुः ॥
विलसच्छवि प्रसरत्प्रभं प्रसरद्रसं सुषमामयम् ।
बहुवैभवं रुचिभासुरं कलयान्वितं बलवर्जितम् ॥
स्फुरितोदयं खचितं श्रिया विकटोच्छ्रयं प्रमदालयम् ।
घनविभ्रमं भुवनाद्भुतं वरदीधिति द्युतिसुन्दरम् ॥

इति पञ्चाक्षरम् ।

अद्भुतवैभव मच्छिमहोत्सव मुज्ज्वलभाषित भूरितरद्युति ।
कान्तिनिकेतन मिद्धतमाकृति चारुतरद्युति सुन्दरदीधिति ।
मनोहरच्छायमुदञ्चितद्युति स्फुरत्प्रभाचारु घनश्रियान्वितम् ।
समुल्लसत्कान्ति विभाविताकृति नियोज्यमेवन्तु षड़क्षरं पदम् ॥

इति षड़क्षरम् ।

समुल्लसितशोभाढ्यो रोचिर्निचयरोचिषः ।
चारुचञ्चत्पलाशाक्षी कान्तिकान्तिनिकेतनम् ॥
वल्गु वल्गद्वपुर्लक्ष्मीर्महामहिममन्दिरम् ।
आभासम्भारसंशोभी दीप्तिमण्डलमण्डितः ॥
प्रभाप्राग्भारसारश्रीरुद्यदुद्यतरद्युतिः ।
मनोरमतमच्छायो विभावैभवशोभितः ॥
चमत्कारकरस्फारः प्रभाप्राग्भावभासुरः ।
मनोरमतमक्रीड़त् कान्तिमण्डलमण्डितः ॥
मनोहरतरस्फूर्ज दूर्जस्वलकलोज्ज्वलः ।

CHATTAMPI SWAMI ARCHIVE

अत्यद्भुतवपुर्लक्ष्मीक्षोभितक्षितिमण्डलः ॥
मनोहरतरोच्छ्राय कायच्छायाचयान्वितः ।
प्रीतिकौतिकरप्रेङ्खत् प्रभासंहतिसंहितः ॥
विस्फुरद्रश्मिविस्मेर विस्मयाविष्टविष्टपः ।
नयनानन्दनोद्दाम रमणीयकमन्दिरम् ॥

इत्यष्टाक्षरम् ।

अवनीतलवर्त्तिष्टग्रामस्तांशुः सम्पदेककुलगेहम् ।
चित्ताकर्षं महौषधिवासः कीर्त्तिकेतक्याः ॥

परिस्फुरत्कान्तिभरप्रचारकः स्वपीड़नेनापि परोपकारकः ।
समीपभाजां हृदयैकहारकः स्वभावसौन्दर्य्य विशेषभूषकः ॥
जगत्प्रमोदोदयदानसज्जनः शुभौघलब्ध प्रबल प्रशंसनः ।
नियन्त्रितानेकमनस्तुरङ्गमः स्थिरीकृतालोककटाक्षविहङ्गमः ॥
प्रमोदपावीकृतसर्वभूतलः प्रतिक्षणक्षीणगुणोर्म्मिशीतलः ।
समुल्लसद्दीधितिपुञ्जमञ्जुलः समस्तचित्तोत्सवकृत् स्वभावतः ॥
जगत्त्रयैकान्तमनोज्ञताभूरनन्यसाधारणकान्तिकान्तः ।
अव्याजमाधुर्य्यसुधानिधानं मनोविहङ्गाहरणैकधामः ॥
निरवद्यसमुद्यदुज्ज्वलस्वगुणश्रेणिमनोहराकृतिः ।
त्रिजगज्जनचित्तचित्रकृन्नयनानन्दसिताभ्रवर्त्तिका ॥
अवनीतलवर्त्तिलोचनामृतवर्त्तिः प्रमदैकमन्दिरम् ।
घनविस्मयचित्रशालिका हृदयाम्भोरुहभानुमण्डलः ॥
हृद्यतरद्युति वारिपयोधिर्लोकविलोचनशीतमयूखः ।
चारुतमापघनौघनिवेशो भूवलयस्थितविस्मयहेतुः ॥
मुख्यस्वामीसम्पदां सम्पदानां लीलाशालाभाविताभावितानैः ।
पुंसां नेत्रक्षेत्रपीयूषवृष्टिर्विश्वोद्दामाश्चर्य्यहर्य्यक्षशैलः ॥
उद्यदुज्ज्वलगुणौघ मेदुरो रामणीयक विलासमन्दिरम् ।
सुन्दरावयवसन्निवेशनः कान्तिकान्तभरभासुराकृतिः ॥

CHATTAMPI SWAMI ARCHIVE

गुणमणिप्रकरैकमहोदधिः सकललोकविलोचनचन्द्रमाः।
विलसदुज्ज्वलकान्तिनिकेतनं सहृदयौघचमत्कृतकारणम्॥
लसदङ्गरुचिप्रचयेन युतो नयनौघमधुव्रतफुल्लवनम्।
हृदयाब्जविजृम्भणतीक्ष्णकरो घनविस्मयसम्मदवासगृहम्॥
तड़ित्पुञ्जमञ्जुप्रसर्पत्प्रतीकप्रभापूरदूरावधूतान्धकारः।
मनोमीनहर्षप्रकर्षैकवर्षं दृगम्भोरुहानन्दसन्दोहहेतुः॥
अखिलजगदवेक्ष्यमाणलक्ष्मीः स्वगुणविराजिभिरङ्गकैः प्रशस्यः।
वसतिरतिवलक्षपक्षचन्द्रप्रकरविजित्वरकीर्त्तिकौमुदीनाम्॥

निःशेषलोकपरितोषकरस्वरूपः
शोभान्वितावयवसुन्दरसन्निवेशः।
दूरं निरस्तखलदूर्वचनावकाशो
व्याजृम्भमाणगुणसंग्रहणप्रवीणः॥
प्रव्यक्त तत्तदखिलावयवानवद्यः
प्रोद्यन्निजोज्ज्वलगुणप्रकराभिरामः।
आनन्दिभिः सहृदयैरभिनन्द्यमानः
सुप्रक्रियाभिरभितः सुविराजमानः॥
कुतुकतरलचित्तैः सज्जनैः स्तूयमान-
स्त्रिभुवनजननेत्रक्षेत्रपीयूषदृष्टिः।
प्रविकलसमुदञ्चद्रूपसम्पन्निधानं
सकलमलविमुक्तः साधुवादेन युक्तः॥
मुखरखरखरोक्तिध्वान्तविध्वंसनेन्दु-
र्विलसदमलकायव्याप्रृतानन्तकान्तिः।
अननुगुणमणिश्रीश्रेणिविश्रामधाम-
क्षयितनिखिलदोषः सर्वसन्तोषहेतुः॥
समुद्यत्प्रत्यङ्गं प्रसृमरमनोज्ञद्युतिभरो
मनोमीनाकृष्टि प्रबलवड़िशं कामम्रृगयोः।

CHATTAMPI SWAMI ARCHIVE

घनाश्चर्य्यस्थानं जगति कुतुकोत्तानितदृशां
नराणामानन्दामृतलहरि दुग्धाम्बुधिरयम्॥
उच्चैश्चेतोहरिणहरणाखर्वगन्धर्वगीतम्।
तं तं नेत्रावलिमधुलिहां माकरन्दप्रवाहः।
सर्वाश्चर्य्यप्रदसमुदयद्रूपसम्पन्निधानं
चञ्चत्कान्तिप्रचयनिचयच्छन्नसम्पन्नगात्रः॥
सकलजनताचित्ताश्चर्य्यप्रदप्रकटोल्लसन्-
मधुरिमपरीपाकोद्रेकस्फुरं द्युतिसुन्दरः।
नयनललितानन्दोल्लासग्रहाधिपमण्डलो
मिलदवयवश्रीरोचिष्णुर्निजान्वयभूषणम्॥
लसद्घनरसच्छटानयनमीनयोर्जन्मिना-
मुदञ्चदतिसुन्दरः प्रसृमर प्रभाभास्वरः।
अनन्तगुणमन्दिरं सुभगतालतामण्डपः
समस्तजनविस्मयप्रदसमुल्लसत्स्वाकृतिः॥
अवयवसन्निवेश जितसर्वमनोज्ञचयो
घनवसुधाजनेक्षण सुधारससेचनकम्।
सहृदयमानसाम्बुजविजृम्भणतीक्ष्णकरो
द्युतिभरभाविताकृतितयातिचमत्कृतिकृत्॥
सर्वाविद्यनिवारकः कृतपरीरम्भः समस्तैर्गुणै-
रानन्दैकनिदानमालवपतिः क्ष्मावासिराशिस्तुतः।
उन्मीलन्निजकान्तिकेतकसमाकृष्टाक्षिपुष्पात्ययो-
र्विद्यन्मानसराजहंसविसरावासाय सौधं सरः॥
सान्द्रानन्दसुधासमुद्रलहरी साम्राज्यमम्नातृभिः
सर्वैः सर्वकलाकलापकुशलैः साकाङ्क्षमुद्वीक्षतः।
उद्यद्दृश्यतरोरुकान्तिपटली विन्यासरम्याकृतिः
साधारण्यपदव्यतीतसहजोन्मीलत्तनुश्रीभरः॥

CHATTAMPI SWAMI ARCHIVE

अङ्गप्रत्यङ्गरङ्गत् प्रचुरतरमहाकान्तिभाराभिरामो
निर्व्याजभ्राजमानानुगुणनिजगुणग्रामविश्रामधाम।
लोकैरालोकमानः प्रमदजनपरित्यक्तनेत्रारविन्दै-
रानन्दस्यैकसौधः सकलवसुमतीमण्डलीसारभूतः॥
एवं साधारणैः शब्दैरौचित्येन निवेशितैः।
दद्भिश्छन्दःसु सर्वेषु कर्त्तव्यं पदयोजनम्॥

अथ संस्कृतप्राकृतयोः समाः।

हाराहार विहार सार सरसाः सम्भोगरोगासुराः
संहारामर वारवारण गणाष्टङ्कार ताराकराः।
लोलोल्लोलविलास वायसहराहङ्कार हीराङ्कुरा
नीहारोरगराग ताल तरला गोविन्द कन्दोदराः॥
तरुणतरणिदासा मोहसन्दोहभासाः
खुरखरतरुघासाः वासरारम्भहासाः।
कर करि किरि कीराः कोल कल्लोल धीरा
मलमलयकरीरा वामदेवास्ति वीराः॥
नरनरककरङ्का दण्डचण्डालरङ्का
दर-सरल-कलङ्काः कम्बलाकारपङ्काः।
खलबहुलकुरङ्गा देहसन्देहसङ्गाः
पर-कुरर-तरङ्गाश्चारुसञ्चारभङ्गाः॥
अरिहरि-परिणाहाः कण्ठ-कुण्ठाहिदाहाः
परिसर परिणाहा मञ्जु-मञ्जीर-वाहाः।
अचल-कुलकुमाराः कुम्भकुम्भीरसाराः
विरल-कवलजाराः सुन्दरोदारपाराः॥
जम्बीर केशरि वराह सुरारि कालाः
काकोल कुन्तल चमूरु विराम वालाः।
आलोल बाहु रण सङ्गर चोल तालाः

CHATTAMPI SWAMI ARCHIVE

संसार केरल समीरण टङ्क भालाः॥
आसार चामर कुलीर तुरङ्ग सूराः
कङ्काल कन्दल कराल विकासपूराः।
हेरम्ब कम्बु विधु सिन्धु बुधानुबन्धाः
कुन्देन्दु मन्दर समीर समूह गन्धाः॥
भीमाङ्क शङ्कर किरीट तमाल कुञ्जा
हिन्ताल तोमर महीरुह विम्ब पुञ्जाः।
हिण्डीर पिण्ड वर सम्बर कोण काणाः
संरम्भ सोम परिरम्भ विकार वाणाः॥
वसन्तावास वेशन्त वासवासव वासराः
कासार सार सरसाः किरणारुणवारणाः॥

एते पुंलिङ्गाः।

हेला खेला कला माला रसाला काहलाऽचला।
कीला लीला ऽवला वाला लोला दोला वसा मसी॥
धरणी धारणी गोणी रोहिणी रमणी मणी।
वीणा वाणी रमा वेणी रोढ़ा गङ्गा तरङ्गिणी॥
कन्दली लहरी नारी रामा भेरी वसुन्धरा।
काली कराली चामुण्डा चण्डा रण्डा तुला मही॥

एते स्त्रीलिङ्गाः।

जल फल पल मूलं वारि कीलाल तूलं
वन पलल दुकूलं लिङ्ग गम्भीर कूलं
सलिल कमल चीरं तुच्छ राजीव नीरं
हल रजत कुटीरं दारु नालं घटीरम्।
कारणं रोहणं चेलं कुहराम्बर मन्दिरम्।
कुड्मलं मण्डलं तामरसं कुण्डलमङ्गदम्॥
घुरारविन्द लोहाङ्क तड़ाग करणं कुलम्।

CHATTAMPI SWAMI ARCHIVE

तोरणं मरणं तुङ्गं मलमागारं भासुरम् ॥

एते नपुंसकलिङ्गाः।

भण देहि गच्छ संहर कुरु चोरय मारया वगच्छेहि।
अवलोकयावचिन्तय खादय चेति धातुजं विद्धि ॥

अथ निरोष्ठ्याः।

नीहार हार हरिणाङ्क हराट्टहास
कैलास काश रद नारद सिंह सङ्घाः।
शेषाहि हंस घनसार हरीन्द्र नाग
हिण्डीर निर्झर शरद्घन चन्द्रकान्ताः ॥
शृङ्गार सागर तड़ाग जड़ाग याग
हर्य्यक्ष तक्षक नख क्षत दीक्षिताक्षाः ॥
नाराच काच कच कीचक चञ्चरीक
चाणक्य चारण गण क्षण काण शोणाः।
संसार सार सरलारि रसाल साल
कङ्काल काल कलि शैल खलालकार्काः ॥
किञ्जल्क कल्क कर शङ्कर कीर हीर
लङ्केश केश गर केशव देश लेशाः।
आनन्द नन्दन धनञ्जय खञ्जरीटाः
कीटाग्नि कण्टक कटाह कटाक्ष यक्षाः ॥
दक्षाङ्क यक्ष जनकाञ्जलि यन्त्र यत्न
रत्नाकरान्धक धराधर धीर सीराः।

एते पुंलिङ्गाः।

गङ्गा गीता सती सीता सिद्धिः सन्ध्या गया गदा।
आशीः काशी निशा नासा कान्तिः शान्तिर्दया दशा ॥
आर्द्रा निद्रा हरिद्रा दृक् द्राक्षा लाक्षा धृतिः क्षतिः।
छाया जाया कथा कान्ता धात्री रात्री रतिर्गतिः ॥

CHATTAMPI SWAMI ARCHIVE

कन्धरा धारणा धारा तारा कारा जरा धरा।
आजी राजी रजन्यत्तिः कीर्त्तिः कन्या तटी नटी॥
नारी सारी दरी दासी घटिका खटिका जटा।
कक्षा रक्षा शिखा सङ्घा कालिन्दी कलिकालका॥

एते स्त्रीलिङ्गाः।

चरण करण चक्रं चैव नक्षत्र तक्रं
रजत शत शरीरं चौर नीराक्षि तीरम्।
धन कनक निधानं ध्यान सन्धान दानं
नलिन नगर गात्रं छत्र नेत्रास्थि दात्रम्॥
आलिङ्गन स्नान शिरस्त्ररित्रं जल स्थल स्थान कलत्र चित्रम्।
कीलाल जालालिक नाल दैत्यं लिङ्गाङ्गणारण्य हिरण्य सैन्यम्॥
अञ्जनाजिन यानास्रक् काञ्चनानन काननम्।
हाटकं नाटकं नाट्यं तैलं चैलं रसातलम्॥
अदनं सदनं स्नानं निदानं दधि चन्दनम्।
अक्षरं लक्षणं लक्ष्यं शस्त्रं शास्त्रं दलं हलम्॥

एते नपुंसकाः।

आशास्तेऽस्ति चकास्ति निन्दति सृजत्याशंसति क्रीडति
ध्यायत्यर्चति याचते द्यति हरत्याराध्यति वश्यति।
शेते गच्छति यच्छतीच्छति नयत्यायाति हन्तीहते
श्वाति स्नाति दधाति याति जयतीत्याद्या क्रियाश्चिन्तयेत्॥

इति प्रथमस्तवके सामान्यशब्दो नाम द्वितीयं कुसुमम्।

अथ शब्दस्तवके वर्णस्थितिः।

अथ वर्ण्यानि कथ्यन्ते तानि यानि कवीश्वरैः।
महाकाव्यप्रभृतिषु प्रबन्धेषु ववन्धिरे॥

CHATTAMPI SWAMI ARCHIVE

"राजा-राजवधू-पुरोहित-कुमारामात्य-सेनाधिपा
देश-ग्राम-पुरी-सरोऽब्धि-सरिदुद्यानाद्रयरण्याश्रमाः।
मन्त्री दूत रणप्रयाण मृगयाश्वेभर्त्त्विनेन्दूदया
वीवाहो विरह-स्वयंवर-सुरा-पुष्पाम्बुखेला-रतम्॥
देव्याः सौभाग्य-लावण्य-शील-शृङ्गार-मन्मथाः।
त्रपा-चातुर्य्य-दाक्षिण्य-प्रेम-मान-व्रतादयः॥
वेणीधम्मिल्लसीमन्तभालश्रवणनासिकम्।
कपोलाधरनेत्रभ्रूकटाक्षरदकन्धराः॥
गण्डबाहुकरोरोजनाभिमध्यवलित्रयम्।
रोमाणि श्रोणिजङ्घोरुपादयुग्मनखक्रमात्॥
पुरोहितो हितो वेदस्मृतिज्ञः सत्यवाक् शुचिः।
ब्रह्मण्यो विमलाचारः प्रतिकर्त्तापदामृजुः॥
कुमारश्शस्त्रशास्त्रश्रीकलाबलगुणोच्छ्रयाः।
वाह्याली खुरणी राजभक्तिः सुभगतोदयः॥
मन्त्री भक्तः शुचिः शूरोऽनुद्धतो बुद्धिमान् क्षमी।
आन्वीक्षिक्यादिकुशलः परिच्छेदी सुदेशजः॥
सेनापतिर्जितायासः स्वामिभक्तः सुधीरभीः।
अभ्यासी वाहने शस्त्रे शास्त्रे च विजयी रणे॥
देशे रत्नखनिद्रव्यपण्यधान्याकरोद्भवाः।
दुर्गग्रामजनाधिक्यनदीमातृकतादयः॥
ग्रामे धान्या लता वृक्षसरसी पशुपुष्टयः।
क्षेत्रारघट्ट केदार ग्रामेयी मुग्धविभ्रमाः॥
पुरेऽट्ट परिखा वप्र प्रतोली तोरण ध्वजाः।
प्रासादाध्व प्रपाराम वापी वेश्या सतीत्वरी॥
सरस्यम्भो लहर्य्यम्भो गजाद्यम्बुजषट्पदाः।
हंसचक्रादयस्तीरोद्यान स्त्रीपान्थकेलयः॥ "

२

"अब्धौ द्वीपाद्रि-रत्नोर्मि-पोत-यादो-जलप्लवाः ।
विष्णुः कृत्यागमश्चन्द्राद्वृद्धिरौर्वोऽब्दपूरणम् ॥
सरित्यम्बुधियायित्वं वीच्यो जलमजादयः ।
पद्मानि षट्पदा हंसचक्राद्या कूलशाखिनः ॥
उद्याने सारणिः सर्वफलपुष्पलताद्रुमाः ।
पिकालिकेकिहंसाद्याः क्रीड़ावाप्यध्वगस्थितिः ॥
शैले मेघौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥
अरण्ये हि वराहेभयूथसिंहादयो द्रुमाः ।
शुककाककपोताद्या भिल्लभल्लगवादयः ॥
आश्रमेऽतिथिपूजैण विश्वासो हिंस्रशान्तता ।
यज्ञधूमो मुनिसुता द्रुसेको वल्कलं द्रुमाः ॥
मन्त्रे पञ्चाङ्गता शक्ति-षाड्गुण्योपाय-सिद्धयः ।
उदयाश्चिन्तनीयाश्च स्थैर्योन्नत्यादिसूक्तयः ॥
दूते स्वस्वामि तेजः श्री विक्रमौन्नत्यसद्वचः ।
शत्रुक्षोभकरी चेष्टा धाष्ट्र्यं दाक्ष्यमभीरुता ॥

युद्धे तु वर्म्म-बल-चार रजांसि तूर्य्य-
निस्वान-नाद-शर-मण्डल-रक्तनद्यः ।
छिन्नातपत्र-रथ-चामर-केतुकुम्भि-
मुक्ताः सुरीहृतभटाः सुरपुष्पवृष्टिः ॥

प्रयाणे भेरिनिस्वानभूकम्पबलधूलयः ।
करभोक्षध्वजच्छत्रवणिक्शकटवेशराः ॥
मृगयायाञ्च सञ्चारो वागुरा नीलवेषिता ।
भटढक्का मृगत्रासः सिंहयुद्धं त्वरा गतिः ॥
अश्वे वेगित्वमौन्नत्यं तेजः सल्लक्षणस्थितिः ।
खुरोत्खातरजोरूपं जातिर्गतिविचित्रता ॥ "

CHATTAMPI SWAMI ARCHIVE

"गजे सहस्रयोधित्वमुच्चत्वं कर्णचापलम्।
अरिव्यूहविभेदित्वं कुम्भ-मुक्ता-मदादयः॥
सुरभौ दोलाकोकिलमारुतसूर्य्यगतितरुदलोद्भेदाः।
जातीतरपुष्पचयाम्रमञ्जरीभ्रमरझङ्काराः॥
ग्रीष्मे पाटलमल्लीतापसरः पथिकशोषवातोल्काः।
शक्तुप्रपाप्रपास्त्रीमृगतृष्णाम्रादिफलपाकाः॥
वर्षासु घनशिखिस्मयहंसगमाः पङ्ककन्दलोद्भेदौ।
जातिकदम्बकेतकझञ्झानिलनिम्नगाहलिप्रीतिः॥
शरदीन्दुरविपटुत्वं जलाच्छतागस्त्यहंसवृषदर्पाः।
सप्तच्छदपद्मसिताभ्रधान्यशिखिपक्षमदपाताः॥
हेमन्ते दिनलघुता शीतयवस्तम्बमरुवकहिमानि।
शिशिरे करीषधूमकुन्दाम्बुजदाहशिशिरोत्कर्षाः॥
सूर्य्येऽरुणता रविमणिचक्राम्बुजपथिकलोचनप्रीतिः।
तारेन्दुदीपकौषधिद्युकतमश्चौरकुमुदकुलटार्त्तिः॥
चन्द्रे कुलटा चक्राम्बुजमानविरहितमोऽर्त्तिरौज्ज्वल्यम्।
जलधिजलनेत्रकैरवचकोरचन्द्राश्मदम्पतिप्रीतिः॥
विवाहे स्नानशुद्धाङ्गभूषोलूलुत्रयीरवाः।
वेदी सङ्गीतभावेच्छा लाजमण्डलवर्त्तनम्॥
विरहे तापनिःश्वासचिन्तामौनकृशाङ्गता।
अब्दसंख्या निशादैर्घ्यं जागरः शिशिरोष्णता॥
स्वयम्बरे शचीरक्षा मञ्च-मण्डप-सज्जता।
राजपुत्री नृपाकारान्वयचेष्टाप्रकाशनम्॥
सुरापाने विकलता स्खलनं वचने गतौ।
लज्जा मानच्युतिः प्रेमाधिक्यं रक्ताक्षता भ्रमः॥
पुष्पावचये पुष्पावचयः पुष्पार्पणेऽर्थिता दयिते।
स्नाला गोत्रस्खलनेर्ष्या वक्रोक्तिसम्भ्रमाश्लेषाः॥ "

CHATTAMPI SWAMI ARCHIVE

"जलकेलौ सरःक्षोभश्चक्रहंसापसर्पणम्।
पद्मग्लानि पयोविन्दु दृग्रागो भूषणच्युतिः॥
सुरते सात्त्विका भावाः शीत्काराः कुड्मलाक्षता।
काञ्चीकङ्कणमञ्जीररवोऽधरनखक्षतिः॥
वर्णेषु वस्तुभावानां दिङ्मात्रमिह दर्शितम्।
सुधीभिश्चिन्त्यमानानां भवत्येवमनन्तता॥
असतोऽपि निबन्धेनानिबन्धेन सतोऽपि च।
नियमेन च जात्यादेः कवीनां समयस्त्रिधा॥

असतोऽपि निबन्धो यथा।

रत्नानि यत्र तत्राब्धौ हंसाद्यल्पजलाशये।
जलेभादि नभोनद्यामम्भोजाद्यं नदीष्वपि॥
तिमिरस्य तथा मुष्टिग्राह्यत्वं शुचिभेद्यता।
अञ्जलिग्राह्यता कुम्भेऽपवाह्यत्वं विधुद्विषः॥
शुक्लत्वं कीर्त्तिपुण्यादौ कार्ष्ण्यञ्चाकीर्त्तिपापयोः।
प्रतापे रक्ततोष्णत्वे रक्तत्वं क्रोधरागयोः॥
विभावर्य्यां भिन्नतटाश्रयणं चक्रवाकयोः।
कामिनान्तेषु कुन्दानां कुड्मलेषु च रक्तता॥
हरितत्वं दिवा नीलोत्पलानाञ्च विकाशितम्।
वर्णयेन्न सदप्येतन्नियमोऽथ प्रदर्श्यते॥
भूर्जत्वग्घिमवत्येव मलये ह्येव चन्दनम्।
सामान्यवर्णने शौक्ल्यं कुलाम्भःपुष्पवाससाम्॥
कृष्णत्वं केशकाकाहि पयोनिधि पयोमुचाम्।
रक्तत्वं रत्न-बन्धूक-विद्याम्भोज-विवस्वताम्॥
तथा वसन्त एवान्यपुष्टानां कलकूजितम्।
वर्षास्वेव मयूराणां रुतं नृत्यञ्च वर्णयेत्॥
नियमस्य विशेषोऽथ पुनः कश्चित् प्रकाश्यते।"

CHATTAMPI SWAMI ARCHIVE

"कमलासम्पदोः कृष्णहरितोर्नागसर्पयोः ॥
पीतलोहितयोः स्वर्णपरागाग्निशिखादिषु ।
चन्द्रे शशैणयोः कामध्वजे मकरमत्स्ययोः ॥
दानवासुरदैत्यानां ऐक्यमेवाभिसम्मतम् ।
बहुकालजन्मनोऽपि शिवचन्द्रस्य बालता ॥
मानवा मौलितो वर्ण्या देवाश्चरणतः पुनः ॥
इति प्रथमस्तवके वर्ण्यस्थितिर्नाम तृतीयं कुसुमम् ।

अनुप्रासः ।

अथो कथादिके राजवर्णनाद्युपयोगिनः ।
अनुप्रासस्य सिद्ध्यर्थं शब्दान् कतिपयान् ब्रुवे ॥
वर्णानामनुवृत्तिर्या नातिदूरान्तरस्थितिः ।
अनुप्रासः स तेनैव सनाथा काव्यपद्धतिः ॥
गतालङ्कारशङ्कोऽपि काव्यबन्धो विराजते ।
वर्णाः सभ्यार्णवोदीर्णसुधासंस्पर्द्धिनो यदि ॥
मृगनाभिसनाभिश्रीः श्रीकण्ठाकुण्ठकण्टकाः ।
सतो यतो यदच्छायो घनाघनघनद्युतिः ॥
स्वर्धुनी ते धुनीतेऽयं निर्यन्निर्जरनिर्झराः ।
मेदुरा पादुरा पाद्दामच्चता रच्चतात् च्चतात् ॥
अर्घ्यमावर्ष्यमाहात्म्यः कोकशोकविलोकनात् ।
कीनाशभीनाशकरः प्रवालप्रवलच्छविः ॥
घनाभोगिन भेगि त्वां सेवते देवतेश्वरः ।
वन्देऽहं गतसन्देहं विमलं कमलं तव ॥
स्फुर्जद्धुर्जटिसङ्काशः कोपगोपतिकेतनः ।
वैरिमर्द्दी पर्द्दीवाणस्तन्द्रश्च चन्द्रचूड़वत् ॥

CHATTAMPI SWAMI ARCHIVE

रणे गणेशसङ्काशो गतार्त्तिः कार्त्तिकेयवत्।
श्रीमद्रामाभिरामश्रीः स त्रिविक्रमविक्रमः॥
विश्वरूपस्वरूपश्रीः क्रतुः पुरुषपौरुषः।
श्रीवत्सलाञ्छनच्छायो धरणीधरदुर्धरः॥
विष्टरश्रवसाविष्टश्च घनापघनाभवत्।
विराज-राज-राजश्रीः पितामहमहामहाः॥
कश्चिद्युश्रवनप्रायः पाकशासनशासनः॥
श्रीमानिन्द्र इवानिन्द्यः समन्युः शतमन्युवत्।
निविड़ोजा विड़ोजावदनघो मघवानिव॥
दम्भजम्भजिरम्भः प्रत्यूहव्यूह इवार्ज्जितः।
महीमहीयान् संसारसारः शक्रपराक्रमः॥
सङ्कल्पकल्पवृक्षश्रीः प्रज्ञावज्ञातवाक्पतिः।
श्रीरङ्गवङ्गदङ्गश्रीर्वलिवालिवलाहली॥
नयज्ञो यज्ञपुरुषः शिपिविष्टनिविष्टधीः।
स्मरघस्मरसङ्काशो भाग्यसौभाग्यभाग्यसौ॥
धूर्य्यमाधुर्य्यवर्ज्यश्रीः कुशली मुषली यथा।
रुचिरो रुचिरोचिष्णुः चमया चमया समः।
काशसङ्काशसत्कीर्त्तिः सर्वदा सर्वदानकः॥
प्रीणाति प्राणिनामेष मनोहरमनोहरः।
महादेवमहादेवः करुणाकरुणालयः॥
तनयो विनयोपेतः केतकः श्वेतकीर्त्तिमान्।
राजते राजतेभाजिः कविराजिविराजितः॥
मणिद्युमणिदुष्प्रेच्योज्ज्वलदुज्ज्वलभूषणम्।
उद्दामधामकामश्री धर्मकर्मणि शर्मभाक्॥
भूखण्डाखण्डलः काण्डचण्डकोदण्डपण्डितः।
प्रचण्डकुण्डलोद्दण्डगण्डमण्डलमण्डितः॥

सन्निधाननिधानन्ते करवं नरवन्दितम्।
नितरां नितराम्भूनि राजसे राजसेवकः॥
हारमणिरमणीया नाकनायकनायिका।
भाविता भावितानेन कलिता ललितालकैः॥
सन्ता कान्तालकान्तासौ श्रेयसां प्रेयसी भृशम्।
कन्दः कन्दर्पदर्पस्य पाटला पाटलाधरा।
खर्व्वीकृतोर्व्वशीगर्व्वा निर्व्वासितरतिद्युतिः॥
रमणीरमणीयासौ सुमनःसुमनःस्मिता।
शवरीकरवीरम्या प्रवराः समरास्तथा॥
पर्वतः सर्वतः श्रीमान् अधुना मधुना गतम्।
बुधा मुधा सुधाबुद्धिर्मुग्धा मुग्धाधरेऽधरे॥
सारदं सारदन्तोऽयं रुचिरं सुचिरं न किम्।
अमुना यमुनातीरे कैशवं शैशवं पुरा॥
स्फुरदक्षेण दक्षेण स्पष्टदृष्टमदृष्टतः॥
उग्रो गिरीशो गिरिशः शम्भुशोभाच्युतोऽच्युतः॥
कृष्णकृष्णो हृद्यविद्यः सूर्य्यशौर्य्यो रविच्छविः।
भीमभीमो रुद्ररौद्रो धामधाम महामहा॥
मेधा वेधा जिष्णुजिष्णुः शूरशूरो ध्रुवो ध्रुवः॥
देवदेव कालकाल भीमभीम नामनाम।
रामराम धामधाम मांसमांस रक्षरक्ष॥
अरुणारुणः कपिशकपिशः सदावदात विसविसदः।
उन्मीलहीननीलश्रीः परितो हरितोऽतिकामतः श्यामः॥

नरा न राजन्ति सखे सखेदाः
प्रभा प्रभातेव कृशा कृशानोः।
वामोरुवामोरुषितो विधाता
मुक्तासि मुक्तासितकीर्त्तिना त्वम्॥

CHATTAMPI SWAMI ARCHIVE

स्वःसिन्धुतीरेऽघविघातनीरे लसत्समीरे करलभ्यनीरे ।
वसन् कुटीरे परिधाय चीरे करोत्यधीरे न रुचिं शरीरे ॥

आनन्दतुन्दिलपुरन्दरमुक्तमन्दा-
मन्दारदामनिकुरम्बकरम्बितानाम् ।
गङ्गामनङ्गरिपुतुङ्गतमोत्तमाङ्ग-
केशग्रहग्रहिलवीचिभुजां भजामि ॥

इत्यमर्त्यनृपामात्ययुवत्याद्युपवर्णने ।
शब्दान् पश्य यथौचित्यं चित्रानुप्राससिद्धये ॥
सुखानुप्राससिद्ध्यर्थं ज्ञापयाम्यक्षरमुच्यते ।
आदिक्षान्तलिपौ कादि क्षान्तशब्दगवेषणम् ॥
चित्रानुप्रासयमकशब्दनिश्चयकृद्भवेत् ॥ यथा—

कल खल गल चल छल जल तल स्खल दल नल पल फल यल मल हलम् । कीर चीर जीर तीर धीर वीर नीर हीर चीरमिवमन्येऽपि ।

यत् किञ्चिदथ न मया गदितं ग्रन्थस्य गौरवत्रासतः ।
मत्कृतकविकल्पलतापरिमलतस्तद्बुधैर्ज्ञेयम् ॥
इति अनुप्रासो नाम चतुर्थं कुसुमम् । ”

अथ श्लेषस्तवके उद्दिष्टवर्णनम् ।

“उद्दिष्टवर्णनं वर्ण्यप्रकीर्णं संख्यया सह ।
रूढादिश्चेति पञ्चात्र कुसुमानि यथाक्रमम् ॥
शैत्यादिभिर्विभिन्नस्योद्दिष्टवर्ण्यद्वयस्य यत् ।
अभेदः क्रियते श्लेषात् तत् स्यादुद्दिष्टवर्णनम् ॥
सितकृष्णौ विधुहरी शितिताराभ्रकनागराजघनसाराः ।
रामपयोराश्यर्जुनसिंहीजानन्तचन्द्रहासाद्याः ॥

CHATTAMPI SWAMI ARCHIVE

विधुश्चन्द्रो विष्णुश्च। हरि: कृष्ण: सिंहश्च। शितौ धवलमेचकौ। तारा नक्षत्रं अक्ष्ण: कनीनिका च। अभ्रकं गिरिजं मेघश्च। नागराज: शेषो गजश्च। घनसार: कर्पूरं मेघश्रेष्ठश्च। रामौ बलभद्रो दाशरथिश्च। पयोराशिर्दुग्धसमूह: समुद्रश्च। अर्जुन: शुभ्र: पार्थश्च। सिंहीज: सिंहो राहुश्च। अनन्तो बलभद्र: कृष्णश्च। चन्द्रहासश्चन्द्रहास्यं खड्गश्च।

शङ्कर तारकेश सदाकाश व्योमकेशर तालाङ्का:।
नीलांशुकाधिकेशारिष्ट सदासिचयकलकण्ठा:॥

शङ्कर: कम्बुकान्ति: कृष्णश्च। तारकेशश्चन्द्र उज्ज्वलवालश्च। सदाकाश: सर्वदाकाश: सङ्गगणश्च। व्योमकेश: शिवो नभोवाणौ च। तालाङ्को बलभद्रस्तालकलङ्की च। नीलांशुको बलभद्र: कृष्णकान्तिश्च। अधिकेशो अधिकशिरोऽधिकबालश्च। अरिष्टश्चक्रवाकोऽरिष्टश्च। सदासिचय: सिचयो वस्त्रं असिचय: खड्गसमूहश्च। कलकण्ठो हंस: पिकश्च। "कलकण्ठ: पिके पारावते हंसे कलध्वनौ।"

हरिजिष्णुघनाब्धिभ्यो गजा: सिन्धुर्मुरारित:।
अम्भोवाहोऽब्जानि कृष्णा यमुनाकुम्भिलौद्विष:॥

शुक्लश्यामाभिधायका भवन्तीति सम्बन्ध:। मुरारिसिन्धु: गङ्गाकृष्णसमुद्रौ च। अम्बुवाह उच्चै:श्रवा मेघश्च। कृष्णाब्जं नाभिपुण्डरीकं नीलाब्जञ्च। यमुनारिर्बलभद्रो यमुनाद्वेषी च। कुम्भीरवैरी सिंहोऽगस्त्यर्षी च। कृष्णार्थात् तटिनीवाचकशब्दात् परो वरो योज्य:।

नीरदघनोपलसित सदाहिमकरसिन्धुवेणिपृथुलाजाभा:।

सितश्यामवाचका इति पूर्ववत्। कृष्णार्थात्तटिनीवाचकशब्दादरो यथा। कृष्णनदीवरकान्ति: गङ्गाश्रेष्ठकान्ति:। पक्षे कृष्णनदीवरस्य समुद्रस्येव कान्ति:। नीरदो निश्चितो

CHATTAMPI SWAMI ARCHIVE

दन्तो मेघश्च। घनोपलसितः घनोपलस्तद्वत् सितः। घनो मेघस्तद्वदुपलसितः।

सदाधिकेशवच्छायोऽनेकपीयसमच्छविः।
वपुर्महोदधिच्छायं बिभ्रत् सिन्दूरकान्तिमान्॥
स्फटिकाचलसच्छ्रीः पट्टांशुककटिं वहन्।
धौताम्बरश्रियं धत्ते स्फटिकान्तश्रियान्वितः॥
अर्जुनद्युतिविद्योतीत्येवमादि समुन्नयेत्॥
रक्तश्वेतौ हरिशुचिपुष्करशतपत्रसूर्य्यकान्ताब्जम्।
नवहंसमहापद्मार्कसोदराः कमलकीलाले॥

हरिः चन्द्रसूर्य्ययोः। शुचिः श्वेत-वैश्वानरौ। पुष्करं जल-पद्मयोः। शतपत्रं हंसपद्मयोः। सूर्य्यकान्तः स्फटिके सूर्य्यवत् कान्ते च। अब्जः शङ्खाम्बुजयोः। नवहंसः नवहंसे प्रत्यग्रसूर्य्ये च। महापद्मः श्वेतनागे पद्मे च। अर्कः स्फटिकसूर्य्ययोः। कीलालं जलरक्तयोः।

सुहृद्रत्नादिभिर्भानो रत्ने नाग्नेरदांशुके।
जलेभ्यो जन्म शोभाभः सरोजकुसुदारिभिः॥

भानोः परस्मात् सुहृद्रत्नादिभिः सितरक्तौ यथा। रविमित्रं चन्द्रवितुल्यश्च। भानुरत्नं सूर्य्यकान्तः रविपद्मरागौ च। अग्निरत्नं सूर्य्यकान्तोऽग्निपद्मरागौ च। रदांशुकं दन्तवस्त्र-मधरश्च। जलशोभा जलजा चासौ शोभा चेति पक्षे पद्म-कान्तिः। एवं सरोजारिशोभा सरोजस्पर्द्धिशोभा पक्षे सरो-जारिश्चन्द्रः। कुसुदारिशोभा कुसुदस्पर्द्धिशोभा पक्षे कुसुदा-रिरादित्यः।

पीतश्वेतौ गौरद्विजराजकपर्दशम्भुहरिताश्च्याः।
हैमस्तोमाष्टापदमहारजतचन्द्रकलधौताः॥

गौरः श्वेतपीतयोः। द्विजराजो गरुड़चन्द्रयोः। कपर्दः

CHATTAMPI SWAMI ARCHIVE

"शम्भुजटाजूटवराटयोः। शम्भु ब्रह्मत्रिलोचनयोः।
सुशोभितारकूटश्रीः स्वर्णस्तोमसमद्युतिः।
दहनोपलसत्कान्तिर्गाङ्गेयच्छविपेशलः॥
आरकूटोरूप्यसमूहः पक्षे रीतिः सुशोभनवर्णः कनकञ्च।

अथ श्लोकोत्तीर्णानि।

गोपतितार्क्ष्यकान्तिः रविगुरुच्छविः। पक्षे गोपतिरिन्द्रस्तस्य तार्क्ष्यस्तुरङ्गः। वामदेवगिरिर्मनोमनोज्ञोमेरुः कैलाशश्च।

लोहितनीलौ पुष्करहरिद्रुमकमलकृष्णरत्नानि।
सिन्दूरभूषणोत्पलधनञ्जयाम्भोजिनीदलानि॥

यथा पुष्करं पद्माकाशयोः। हरिः सूर्य्यकृष्णयोः। विद्रुमः प्रवालविशिष्टवृक्षयोः। कमलं पद्मपानीयजलयोः। कृष्णरत्नं कौस्तुभेन्द्रनीलयोः। सिन्दूरभूषणं सिन्दूरालङ्कारगजयोः। उत्पलमुत्कृष्टेन्दीवरयोः। धनञ्जयोऽग्निपार्थयोः। अम्भोजिनीदलं पत्रपुटकिन्योः।

कमलाधिपपद्मेशौ नागजित्कान्तसूर्य्यभूः।
रत्नाकरवरश्रीको सदाधिकमलद्युतिः॥

कमलाधिपपद्मेशौ सूर्य्यकृष्णौ। नागजित् गरुड़ो नागस्पर्द्धी च। कान्तः कमनीयः कं जलं तस्यान्तश्च। सूर्य्यभूः सूर्य्योद्भवो यमश्च।

सदा सिन्दूरमुज्जेता कलयन् कमलश्रियम्।
स्फुटशोभनताम्रश्रीर्वराहस्वामिदीधितिः॥
एवं सुसम्पन्नस्वःप्रभः विदूरमणिदीधितिः।
प्रवालप्रवलच्छायः कलभानुमितच्छविः॥
शीतश्यामो कृष्णाम्बरमधुजिद्ध्वान्तजेतारः।
विद्युत्कान्तध्वान्तद्वेषि हरिः स्वर्णच्छायाः॥

इति श्लेषस्तवके उद्दिष्टवर्णनं प्रथमं कुसुमम्। "

CHATTAMPI SWAMI ARCHIVE

अथ श्वेतानि ।

६० सुधांशूच्चैःश्रवः शम्भुकीर्त्ति ज्योत्स्नाशरद्घनाः ।
प्रसादसौधतगरमन्दारद्रु हिमाद्रयः ॥
सूर्य्येन्दुकान्तकर्पूरकरम्भा रजतं हविः ।
हिम्मौकभस्महिण्डीरचन्दनं करका हिमम् ॥
हारोर्णनाभतन्त्वस्थि स्वर्गङ्गा भवदाम्बकम् ।
कैलासकाशकार्पासहासवासरकुञ्जराः ॥
नारदः पारदः कुन्दः खटिका स्फटिकादयः ।
कृष्णानि केशवः सौरी चौरचन्द्राङ्कराहवः ॥
विन्ध्याञ्जनाद्रि वृक्षा हि वनभैरवराक्षसाः ।
शिवकण्ठघनद्वैपायनरामधनञ्जयाः ॥
शनिः द्रुपदजा काली कलिकोलयभासुराः ।
केशकज्जलकस्तूरी राजपट्टविदूरजम् ॥
विषकोषकुहूः शस्त्रागुरुपापतमो निशाः ।
मसी पङ्कमदाम्भोधि यमुना धूमकोकिलाः ॥
गोलाङ्गूलास्य गुञ्जास्य कण्ठः खञ्जनकोकिलाः ।
गरलं तालतापिच्छतिलेन्दीवरवल्लयः ॥
रसावद्भूतशृङ्गारौ कटाक्षोऽलिः कनीनिका ।
नीली जम्बुफलं मुस्ता काकक्षत्या कुकीर्त्तयः ॥
भिन्नच्छाया गजाङ्गार खलान्तःकरणादयः ।
नीलालि शुकशैवालदूर्वावाललवणं बुधः ।
वंशाङ्कुरो मरकतेन्द्रनीलार्कहयादयः ।
शोनानि भौम-तीक्ष्णांशु-ताम्र-कुङ्कुम-तक्षकाः ॥
गुञ्जेन्द्रगोप-खद्योत-विद्युत्-कुञ्जरविन्दवः ।
हिङ्गूल-कुक्कुटशिखा-तेजः-सारसमस्तकम् ॥
माणिक्यं हंसचञ्चूश्री शुकमर्कटयोर्मुखम् ।

CHATTAMPI SWAMI ARCHIVE

चकोर-कोकिल-पारावतनेत्र-नखाम्नयः ।
कुसुम्भकिंशुकाशोकजवाबन्धूकपाटलाः ॥
कमलं दाड़िमीपुष्पं विम्बं किम्पाकपल्लवौ ।
ताम्बूलरागो मञ्जिष्ठालक्तकं रक्तचन्दनम् ।
त्रेता नक्षत्र क्षत्रधर्मं रौद्ररसादयः ॥
पीतानि ब्रह्म जीवेन्द्र गरुड़ेश्वरहृग्जटाः ।
गौरी द्वापर गोमूत्र मधु वीररसो रजः ।
हरिद्रा रोचना वीतिगन्धके दीपचम्पकौ ।
किञ्जल्कवल्कशालि हरितालो मनःशिला ।
कर्णिकारं चक्रवाकवलयोः शारिकामुखम् ॥
केशरांशुकमण्डूक सरामकनकादयः ॥
धूसराणि रजो लूता करभी गृहगोधिका ।
कपोतमूषिकौ रङ्कावाककण्ठ खरादयः ॥

उपमेयस्य शोभातिशयख्यापनाय कयापि युक्त्या विशे- ,,
षणैरलङ्कृतमुपमानं कुर्वीत । यथा—

'सुरनिकरकराग्रव्यग्रमन्थानशैल-
क्षुभिततरलदुग्धाम्भोधिकल्लोलकान्तिः ।
हिमकिरणमरीचिव्यूहविभ्राजमान-
क्षितिधरपतिचूड़ाजाह्नवीफेनकान्तिः ॥
तुहिनगिरितनूजानम्रभूतेशचूड़ा-
गलितगगनगङ्गाधौतशीतांशुगौरः ।
गिरिशमुकुटचन्द्रज्योतिरुद्योतमान-
स्फटिकशिखरिशृङ्गस्पर्द्धमानाङ्गकान्तिः ॥ इति श्वेतम् ।
मुकुटगलितगङ्गानीरकल्लोलमाला-
स्नपितगिरिशकण्ठस्पष्टरुग्दैहयष्टिः ।
अभिनवजलवाहव्यूहधारासिशुद्धा-

स्तनशिखरिगरीयःशृङ्गतुङ्गाङ्गलक्ष्मीः ॥
दिनपरिवृढपुत्रीगर्भनीलारविन्द-
प्रसृमरमधुपालीपद्धतिप्रख्यलक्ष्मीः ।
जलशयनशरीरं माररोचिः प्रपञ्च-
स्फुरितसरिदधीशभ्राजमानाङ्गयष्टिः ॥ इति कृष्णम् ।
मसृणघुसृणपङ्काभ्यङ्गसम्पन्मृगाक्षी-
कुचकलसपिधानो कामकौसुम्भकान्तिः ।
तरुणतरणिकान्तिव्रातसंसर्गरज्यत्-
कमलदलनिकायप्रायकासप्रभोर्म्भिः ॥
अभिनवरविरश्मिद्योतितप्राच्यभूभृ-
च्छिखरलसदशोकस्मेरपुष्पोपमानः ।
परिकुपितमृगाक्षीलोचनप्रान्तरोचि-
स्फुरितकमलकर्णोत्तंससङ्काशकान्तिः ॥ इति रक्तम् ।
मधुरिपुपदनिर्यज्जाह्नवीवारिपूर-
स्नपितगरुडपत्रप्रख्यसंलक्ष्यकान्तिः ।
तरुणकिरणमालीस्फुर्जदंशुप्रवाह-
स्मितकनकसरोजव्यूहतुल्याङ्गकान्तिः ॥
जलधरणिकुरम्बोद्दामधारानिपात-
स्नपितकनकशैलस्पर्द्धिवर्द्धिष्णुकान्तिः ।
तरुणतरमृगाक्षीगण्डरोचिःप्रपञ्च-
स्फुरितकनककर्णोत्तंससङ्काशलक्ष्मीः ॥ इति पीतम् ।

इत्यादि सदृशं सदृशेनोपमेयं यथा—

अमरनिकरयाच्ञाप्रस्फुरत्कामधेनु-
स्तनगलितपयोवद्धारती भाति यस्य ।
हिमकिरणमयूखव्रातभिन्नेन्दुकान्त-
प्रसरदमृततुल्या यस्य वाचो विभान्ति ॥

CHATTAMPI SWAMI ARCHIVE

दनुतनुजविपक्षक्षुब्धदुग्धाब्धिगर्भो-
ल्लसदमृतसमाना रेजिरे यस्य वाचः।
मदनदमनचूडाचन्द्ररोचिष्णुगङ्गा-
लहरिभरसनाभिः शोभते यस्य वाणिः॥

इति द्वितीये श्लेषस्तवके वर्ण्यं नाम द्वितीयं कुसुमम्।

अथ प्रकीर्णम्।

सम्पूर्णगर्भवृत्तानि मुखपद्मेन्दुदर्पणाः।
चक्रारघट्टतिलकच्छदङ्गपुटघ्राणकाः॥
आवर्त्तः कमठो लूताग्रहं छत्रमपूपकम्।
आलवाल मषीजाल चर्मकं स्थालकादयः॥
वृत्तानि राहुनारङ्गस्कन्धधम्मिल्लमोदकाः।
रथाङ्गलावककुत्कुम्भिकुम्भाण्डकादयः॥
कर्णपाशभुजापाशाक्रष्टचापघनाघनम्।
मुद्रिका परिखा योगपट्ट हार स्रगादयः॥
त्रिकोणानि हलेशाच्छिकामाच्छि वह्निमण्डलाः।
सव्यचराद्यदमौलि शृङ्गाटशकटादयः॥
वक्राण्यलकभालभ्रूनखाङ्काङ्कुशकुञ्चिकाः।
भग्नकङ्कणवाणेन्दुदात्रकुद्दालचन्द्रकाः॥
शुकास्यं किंशुकं विद्युत् कटाक्षेन्द्रधनुः फणाः।
पुरोधः करकोलेभदन्तसिंहनखादयः॥

गुणतो वर्ण्याणि।

तीक्ष्णानि प्रतिभा हीर कटाक्षा दुर्वचो नखाः।
गुरूणि सद्मनः श्रोणिकवाटस्तनवृन्दयः॥
सुखदानि शशी गीतपुष्पलक्ष्मीः सुतोद्भवाः।
नष्टानि सुस्पृहालब्धि वियुक्तप्रियसङ्गमाः॥
दाढ स्वातन्त्र्यसम्भित विद्यासन्तोषसूक्तयः।

CHATTAMPI SWAMI ARCHIVE

दुःखानि पारतन्त्र्याधिव्याधिमानच्युतिद्विषः॥
कुभार्य्याश्लेषकुग्रामवासकुस्वामिसेवनम्।
कन्यावहुत्वं दुःखत्वं निवासः परवेश्मनि॥
वर्षप्रवासो दुर्भार्य्या कुभृत्योऽर्द्धहलं कृषौ॥
स्थिराण्यद्री भटः साध्वी धर्माधर्मौ सतां मनः॥
अस्थिराण्यबला दोलस्याङ्गयौवनदुर्जनाः।
स्वामि प्रसादेभकर्णखड्गमत्स्यकपिश्रियः॥
मन्दगानि शनि ज्ञानि हंस हंस गज स्त्रियः॥
क्रूरस्वराः काकघूककवराहोष्ट्राश्वगर्दभाः॥
वलिष्ठास्त्वनिलो विष्णुर्गरुड़ो हनुमान् यमः।
महावराहः शरभः सत्प्रसिद्धा गजः पृथुः॥
हली वाली वलिर्भीमः सती शेषः पुरा कृतम्।
सुरूपा नकुलेनाश्विनलकूवरमन्मथाः॥
उष्णानि ज्वरतापाधि प्रतापा दुर्वचस्तपः।
मधुराणि विदग्धोक्ति प्रियाधर स्वशिल्पिषः॥

आरोप्यगुणाः।

औदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यसौन्दर्य्यशक्तयः।
माधुर्य्यैश्वर्य्यचातुर्य्यमर्य्यादास्थैर्य्यकीर्त्तयः॥
तेजस्तारुण्यषाड्गुण्यशीलचक्रवर्त्तता।
ब्रह्मण्यदानदाक्षिण्यशीलशौचसुवेशता॥
सत्यौन्नत्यकलावन्धुमान्यभक्तिकृतज्ञता।
दृढ़प्रतिज्ञता प्रज्ञा श्रद्धा मेधोद्यमः क्षमा॥
दयानयार्जवाचारसन्तोषमितभाषिता।
विद्याविवेकविनयारोग्यसौभाग्यवक्तृता॥
उत्साहित्वकुलीनत्वनिर्दोषत्व मदेच्छता।
स्वावाधित्वोपकारित्वाश्रयास्तिक्याविसङ्गता॥

प्रसादप्रतिभाष्ट्याधिगम्यत्व सत्त्वायताः।
श्रीर्माहात्म्य महारम्भ निर्दम्भत्वाद्यभीषताः॥
बहुश्रुतत्वसौजन्यपरिच्छेदाप्रमादिताः।
जितेन्द्रियत्वागर्वत्व स्वधर्मकथनादयः॥

अथ सर्वाङ्गकथनम्।

प्रपादाङ्घ्रिगुल्फपार्ष्णिजङ्घाजानूरुवङ्क्षणम्।
कटित्रिकनितम्बस्फिक्वस्थ्युपस्थककुन्दरम्।
जघनं जठरं नाभिवलिवक्षोजचूचुकम्।
क्रोडोरो जत्रुपृष्ठांस कक्षा दोः पार्श्वमध्यमम्॥
प्रगण्डः कूर्परो हस्तः प्रकोष्ठो मणिबन्धनम्।
अङ्गुल्यङ्गुष्ठ करभ नखपर्व चपेटकम्॥
कण्ठः शिरोधरा श्मश्रु मुखौष्ठ चिबुकं हनुः।
सृक्क तालू रदा जिह्वा नाशा भ्रू गण्ड लोचनम्॥
अपाङ्गतारकाकर्णभालमस्तकमूर्द्धजाः।
यथासम्भवमेतेषु वर्ण्यं स्त्रीपुंसयोर्बुधैः॥

पादाग्रादि।

यथा—विप्रपदमनोहरो विष्णुवक्षःस्थलवत्। द्विपादरचितस्थितिर्नृपवत्। सदाचरणस्थितिं बिभ्रद्भूमिवत्। गूढपादग्रन्थिर्मन्दराकर्षणरज्जुवत्। शुद्धपार्ष्णिर्विजिगीषुवत्। जङ्घालसत्कान्तिश्चन्द्रवत्। सज्जानुगतवैभवो धनिकवत्। रम्भोरुकान्तिः कन्दर्पवत्। सुवङ्क्षणेन हर्षयन् गणेशवत्। कटिकान्तिस्थितिं बिभ्रन्नृपवत्। सत्रिकामोदितो यज्ञपुरुषवत्। सदामनितो बालङ्कृतो नन्दकुमारवत्। नवस्तिमितकान्तिराषाढान्तरम्यभूभागवत्। सुधीरोपस्थानमोदितोऽर्जुनवत्। नवककुन्दरचितशोभः शिशिरवत्। सर्वदारोहपेशलः सुभगवत्। सज्जघनो वर्षाकालवत्। सदापि चण्डसंरम्भो नृपतिवत्। नाभिभूत-

CHATTAMPI SWAMI ARCHIVE

स्थितिं वहन् मनस्विवत्। छुतबलिशोभितः कैवर्त्तवत्। द्विपयोधरसाटोपो नृपवत्। कुचेष्टाभोगभासुरोऽधमवत्। मञ्जुलकुचाग्रविभ्रद्वनवत्। उच्चैरङ्कसमन्वितो दुष्कालवत्। स्पष्टमुत्सङ्गपेशलः प्रातश्चक्रवत्। रम्यरोमान्वितो भल्लूकवत्। सदादीर्घपृष्ठविराजितः पातालवत्। स्वमांसरुचिः सिंहवत्। नवकचान्तः श्येनवत्। विभुजातिमनोरमो नृपवत्। सुपार्श्वभूषितो रावणवत्। विलसन्मध्यमः स्वरसमूहवत्। अधिकप्रगण्डभूषितोऽरण्यवत्। उल्लसत्कफोणिमाधारो जरारोगिवत्। प्रहस्तस्थितिपेशलो रावणसैन्यवत्। करभान्वितो विन्ध्यपरिसरवत्। विप्रकोष्ठस्थितिः प्रणववत्। लसन्मणिबन्धभासुरो मुकुटवत्। निजाङ्गुलिकान्तः कालसर्पवत्। स्फुरत्करभो गजाननवत्। नखरस्थितिभासुरः शिशिरार्कवत्। सुपर्वभूषितो मेरुवत्। उच्चपेटकस्थितिस्ताम्बूलिकपर्णवत्। अधिकण्ठमनोहरो मन्त्रवत्। गलच्छायासुन्दरः कृष्णपक्षेन्दुवत्। उल्लसितशिरोधरान्वितो वनवत्। सुग्रीवोदितवैभवो रामवत्। अधिकधरान्वितो नृपवत्। सदाश्मश्रुतः कान्तः पर्वतवत्। अधिकानलरोचिष्णुर्गिरिवत्। मधुराधरः कृष्णबाहुवत्। स्फुरन्महादंष्ट्रिकान्तः पल्वलवत्। मुखरोचितवैभवः कथकवत्। पृथुलास्यमनोहरो नर्त्तकवत्। बहुधा वदनस्थितिः सैन्यवत्। हनुमद्विभवान्वितो रामवत्। महास्फक्कायशोभितो नृसिंहनखाग्रवत्। सुसम्पन्नसुतालुनो रेणुकाशिरोवत्। रसज्ञानवर्द्धिसमुल्लासो धातुवादिवत्। कलयन्नासिकास्थितिं पान्थवत्। नवभ्रूचितः शिशुपालवत्। सदालोचनभासुरो मन्त्रिवत्। सुदर्शनमनोहरो विष्णुवत्। स्पष्टां वक्रस्थितिं बिभ्रत् सरोवरवत्। सदोच्चणालङ्कृतश्रुतिमार्गो यजमानवत्। कलापाङ्गमनोहरो मयूरवत्। उल्लासिता-

वासो वसन्तवत्। अधिकर्णस्थितिं बिभ्रत् दरिद्रवत्। वहन् वैश्रवणस्थितिं कैलासवत्। उच्चैःश्रवःस्थितिं बिभ्रदिन्द्रवत्। प्रतिभाभासितस्थितिं बिभ्रत् कविवत्। अलिकान्तद्युतिं बिभ्रत् पद्मवत्। स्फुरत्पृथुललाटश्रीर्भृगुकच्छवत्। उत्तमाङ्गस्थितिं बिभ्रत् कन्दर्पवत्। सदाबालमनोहरो वृक्षवत्। बहुकुन्तलसद्युतिः सुभटवत्। अधिकेशश्रियं बिभ्रन् नन्दिवत्। कचरोचितः समुद्रवत्।

देहवर्णनम् यथा—काले वरस्थितिं बिभ्रत् कुमारीवत्। सुसम्पन्नवपूरम्यो नृपवत्। साक्षादधिकविग्रहो दैत्यवत्। उच्चैरङ्गमनोहरो नन्दनवत्। अधिकायस्थितिं बिभ्रत् कृपाणवत्।

अथोपमा। विष्णुरिवाहीनभोगसङ्गतशरीरो विपन्नाशनः सुदर्शनान्वितः। शिव इव परमहसितश्रीः सुशोभनगरस्थितिः महासेनानुयातो विष्वक्सेनोल्लासितविग्रहः। समुद्र इव समानघनरसभासितो बहुलवारणो नदीनदेशः सुधामाश्रयश्च। सत्यलोक इव हिरण्यगर्भश्रीः। सोमेश्वर इव प्रभासङ्गतः। रविरिव महोदयान्वितः। अनिरुद्ध इव सदोषारुचिः। उद्धतसारसागर इव पारिजातः। रोहण इव सुरुचिरमणी रमणीयः। चन्द्र इव वलक्षामोदितश्रीः। प्रावृषेण्यहंससङ्ग इव समानसङ्गतः। श्रोत्रिय इव सदाचारप्रियः। देव इवातिसम्पन्नवसुधाभोगी। प्रावृट्काल इव सुखद्योतः। तूणीर इव सदारोचितः। वैद्य इव स्वस्थामोदितश्रीः। वणिगिव उपायनवशल्लक्ष्मीः। सुराष्ट्र इवाधिकङ्गीरचितस्थितिः। भृङ्ग इव प्रियङ्गीरचिताटोपं बिभ्रत्। तरुणीगण इव पुरोगौरसाटोपश्रीः। कामिनीकेशपाश इव सदामरसमधुरः। दीक्षित इव सुराज्यघटनादक्षः। दशरथ इवाभिरामोल्लसितश्रीः।

अथ वनवर्णनम्। नृपसैन्यमिव सदाफलकसल्लक्ष्मीकं

CHATTAMPI SWAMI ARCHIVE

सज्जं वीरगणं बिभ्राणम्। विष्णुवक्षःस्थलमिव पुन्नागकृत-मालालङ्कृतम्। रुद्रभालस्थलमिव स्फुरितामलकीलाज्वा-नलम्। कामशरीरमिव सर्वदा रूपशोभितम्। चन्द्रबिम्बमिव विशाखानुगतम्। समुद्रमिव विद्रुमशोभितम्। रामसैन्य-मिव सज्जपावनवैभवम्। रविमिव तापिञ्छविराजितम्। नेपालमिव विराजिताम्रश्रियम्। चैत्रमिव बहुधान्यपुष्ट-श्रियान्वितं वनम्।

अथ नगरादि वर्णनम्। हिमवन्तमिव सदा गजाति-मनोहरम्। शृङ्गाटोपचितं बहुशो भवनान्वितं नगरम्। अथ वृषभः। नारीव शृङ्गारोपचितस्थितिः। सर्प इव सद्-विषाणश्रियं बिभ्रत्। लोह इव सदावपुच्छविराजी। अथ पक्षी। नृप इव विपक्षोपचितवैभवः। रण इव स्फुरद्-विपक्षस्थितिः। तडाग इव शतपत्रविराजितः। अथ मेघः। पद्म इव सदामोदरसोदयः। शरत्काल इव उच्चकैरवभूषितः। अथ चन्द्रः। गिरिरिव कन्दरचितशोभः। प्रावृट्काल इव सदावशमुपागतः। रावण इव सकलङ्काभोगः। रविरिव सुधा-मोदितश्रीः। अथ कामुकः। स्थानुरिवापत्रपः। गज इव परम-हेलाविलासी। स्वर्ग इव सुरतरुश्रियं बिभ्राणः। अथ दुर्जनः। भृङ्ग इवाधिकमहोल्लासी। कुहूचन्द्र इव सूर्यसङ्गतः। अथ समुद्रः। तारागण इव तिमिरोचितः। वियोगीव विस्तारि-तापः। अथ गौः। रसवतीव समांसमीना। अथ गजः। हरिरिव पद्माकरसमुत्थितः। स्वर्ग इव सदानवारिः। अथ वराहः। गणेश इव परमोदकरुचिः। अथ वणिक्। जैननय इव बहुलक्षपणः। अथ कामिनीजनः। नागर इव कलहाव-लोकितस्थितिः। अथ तार्किकः। शुक्र इव सदनुमानः। अथ वाजी। निर्व्यापार इव पृथुलक्षणः। अथ कवाटम्।

CHATTAMPI SWAMI ARCHIVE

कविरिव बहुलोहम् । निशीथ इव प्रबलतमोवाहिनी । अथ रावणः । भूमण्डल इव गिरिशतश्रियं बिभ्राणः । अथ प्रावृट्कालः । विष्णुरिव सदारमानवप्रीतिकृत् । अथ गिरिः । महाकविश्लोक इव सरसोपचितपादः । अथ परिव्राट् । वर्षोपल इव सत्वरक्षयान्वितः ।

खण्डश्लेषाः ।

"अथ शब्दैरपूर्वाद्यैः पूर्वभागप्रयोजितैः ।
श्लेषाय शब्दमध्येषु निक्षिपेदक्षरं यथा ॥

अपूर्वसूरचेष्टः । आचितखेटकशोभी । उद्योतितपरागशोभः । अञ्चितगजयुतः । खचितद्योतयुक्तः । घनवर्द्धिस्मरः । छविराजितगलः । आमोदितवनश्रीः । धरोचितबलः । न व्याप्तचक्रनाथः । परोचितकनशोभी । प्रमोदितकटस्थितिः । वलोचितहलश्रीः । वामोदितमनःस्थितिः । विक्रान्ततरोपेतः । विभूषितपदान्वितः । वियुक्तजनप्रियः । व्याप्तपक्षहारी । भावोचितरतश्रीः । रचितमणिभासुरः । सततरसस्थितिः । स्थानोदितवरश्रीः । क्षमोदितपणस्थितिः । संयुक्तगवस्थितिः । संप्राप्तसारभूषणः । सन्दूषिताशययुक्तः । सम्भावितमदोदयः । कलोपयुक्तकपोतवान् । प्रस्खलितप्रबालोपेतः । प्रभ्रष्टप्रमोदोदयः । वियुक्तविरहस्थितिः । मानोपयुक्तमानवधनः । मारहितमाधवोल्लासितः । नरहितनगरालङ्कारः । सुरहितसुधर्माश्रयः ।

रचितश्लेषसंश्लेषैर्वं स्वर्वर्णादिनामभिः ।
उपमानकृतोल्लासैः साधयेत् सर्ववर्णनम् ॥
अहो गौरवसन्नद्धशौर्यामिनीकामिनीपतिः ।
सुपर्वपर्वतौपम्यभङ्गीमङ्गीकरोत्यसौ ॥
गौरीभूतकलाशाली परशुभ्रामितोदयः ।
सुपीवरसितोल्लासः स्पष्टां श्वेतश्रियं वहन् ॥

CHATTAMPI SWAMI ARCHIVE

सदावलाकासितश्रीर्गिरिशाचलसच्छविः।
स्फुरच्चन्द्रकसल्लक्ष्मीर्घनसारद्युतिं वहन्॥
सदानवसुधाशोभाविभ्राणो राजतश्रियम्।
जातरूपचयच्छायो मधुपीतप्रभान्वितः॥
कर्णिकारसितच्छायः परागश्रीविराजितः।
अधिकारण्यसंशोभी नवेन महसा युतः॥
बहुलो हितसम्पत्तिः प्रवालद्युतिपेशलः।
अधिकद्रुश्रियं बिभ्रत् कलारचितवैभवम्॥
नवधूसरसाटोपः सदा सरलसद्रुचिः।
विभात्यधिकपोलश्रीरासभासितवैभवः॥
असितत्वमनोहारी बहुश्यामलतान्वितः।
स्वभावलीनसल्लक्ष्मीः सदारामोदितद्युतिः॥
केशवामोदितच्छायो न दीनश्रीमनोहरः।
अन्धकारातिरोचिष्णुर्विभ्रत् कुवलयस्थितिम्॥

स्वर्गः। स्वर्जनस्थितिरोचिष्णुः स्वर्गलाभकरस्थितिः।
मदादिविहितोल्लासः सुरावासनयान्वितः॥
व्योम। सव्योमासङ्गविद्योति सन्नभोगमनस्थिति।
अभ्रान्तस्थिति रोचिष्णु सदाकाशकरस्थिति॥
भूमिः। स्वयम्भुस्थितिविभ्राजी सम्पन्नवसुधास्थितिः।
स्फुरद्वराङ्गसंशोभी सुक्ष्मासमलङ्कृतः॥
पातालम्। सदा वलिसमुल्लासी सज्जपातालवैभवः।
अहीनभोगविभ्राजी भूदारस्थितिसुन्दरः॥
वनादिः। सश्रीकाननरोचिष्णुः कान्तारचितवैभवः।
अधिकासारसारश्रीर्विधुनीत श्रियं वहन्॥
मेघः। स्वर्गस्थितिमनोहारी सदानीरोचितस्थितिः।
सज्जलक्षणविद्योती सदभ्रस्थितिपेशलः॥

CHATTAMPI SWAMI ARCHIVE

गृहाधारः। सम्यग्वेश्मनि स्थायी सदनस्थितिभासुरः।
सद्मनः स्थितिमुद्बिभ्रत् सुशोभनिलयस्थितिः॥
जलाधारः। अहो वामनसाटोपः सदा खर्वतमस्थितिः।
अधिकं प्रांशुसंशोभी सर्वदा बालसंस्थितिः॥
स्थिरादिः। अचलस्थितिविभ्राजी सदास्थिरचितस्थितिः।
सत्वरोचितलक्ष्मीको मनोज्ञवशलक्षणः॥
समीपम्। उपकण्ठस्थितिं बिभ्रत् सनीडस्थितिपेशलम्।
अभ्यर्णस्थितिविभ्राजि गङ्गाम्बुनिकटस्थिति॥
वैपरीत्यम्। परमश्लाघी विशदच्छायः स्वचलच्छायो हृद्यप्रतिभः।
अपिनद्धाङ्गः कान्तोऽङ्गेन प्रखरोऽत्यन्तं क्षितिमापन्नः॥
इति श्लेषस्तवके प्रकीर्णं नाम तृतीयं कुसुमम्।

अथ संख्या।

एक—भालेन्दुहस्त्यश्वगजास्यरद-शुक्रदृक्॥
द्वयं—पक्ष-नदीकूलासिधारा रामनन्दनाः॥
त्रयं—कालाग्नि-भुवन-गङ्गामार्गशक्तिक् गुणाः।
ग्रीवालेखा कालिदासकाव्यं शूलशिखावलिः॥
सन्ध्या पुरःपुष्कराणि रामविष्णुज्वराङ्घ्रयः।
चत्वारि—वेद ब्रह्मास्य वर्णाब्धि हरिबाहवः॥
स्वर्दन्तिदन्तसेनाङ्गोपाययामयुगाश्रमाः।
पञ्च—पाण्डवरुद्रास्येन्द्रियस्वर्गव्रतान्वयः॥
महापाप-महाभूत-महाकाव्य-महामखाः।
पुराणलक्षणान्यङ्गानिलवर्गेन्द्रियार्थकाः॥
षड्—वज्रकोण-त्रिशिरो-नेत्र-तर्काङ्ग-दर्शनम्।
चक्रवर्त्ति महासेन वदनर्तु गुणा रसाः॥
सप्त—पाताल भुवन मुनि द्वीपार्क वाजिनः।
वाराब्धिपूरराज्याङ्ग व्रीहि-वह्नि-शिखादयः॥

CHATTAMPI SWAMI ARCHIVE

अष्टौ—योगाङ्ग-वस्वीशमूर्त्तिर्दिग्गज सिद्धयः ।
ब्रह्मस्तुति व्याकरण दिक्पाला हि कुलाद्रयः ॥
नवाङ्गद्वारभूखण्ड-क्रतु-रावणमस्तकाः ।
व्याघ्रोस्तन सुधाकुण्ड सेवध्यङ्ग रस ग्रहाः ॥
दश—हस्ताङ्गुलिः शम्भुबाहु रावणमस्तकाः ।
कृष्णावतारदिग्विश्वदेवावस्थेन्दुवाजिनः ॥
एकादश—महादेवाः सेनाश्च कुरुभूपतेः ।
द्वादशार्का मास राशि संक्रान्ति गुहवाहवः ॥
सारिकोष्ठक सेनानी नेत्रच्छायापति मण्डलाः ।
त्रयोदश स्वस्ताम्बूलगुणा अथ चतुर्दश ॥
विद्या यमो मनुः स्वाराट् भुवन भुवतारकाः ।
तिथयः स्मुः पञ्चदश षोड़शेन्दुकलाम्बिकाः ॥
अष्टादश द्वीप विद्या पुराण स्मृतिधान्यकम् ।
विंशती रावणभुजाङ्गुलयोऽथ शतं यथा ॥
धार्त्तराष्ट्राः शतभिषक्तारकाः पुरुषायुषम् ।
रावणाङ्गुल्यब्जदल शत्रुयज्ञादियोजनम् ॥
सहस्रं जाह्नवीवक्त्रं शेषशीर्षाम्बुजच्छदाः ।
रविकरार्ज्जुनबाणरेणु शाखेन्द्रतृष्णयः ॥

एतेषां क्रमेण यथासम्भवमुदाहरणम् ।

एकेन भूमिरिव मेरुमहीधरेण
वक्षःस्थली मधुरिपोरिव कौस्तुभेन ।
द्वौ विन्दुनेव दशनेन गणाधिनाथः
शुभ्रेन देव ! भवतालमकारि धात्री ॥

पीड्यमाना दृढं द्वाभ्यां तव दोर्भ्यां इव प्रिया ।
सिस्वेद च चकम्पे च संमुमोह च सा चमूः ॥
कण्ठोऽयमस्या मृदुमध्यतारस्वरत्रयाधार इति त्रिरेखः ।

CHATTAMPI SWAMI ARCHIVE

मुदं ददाति त्रिजगज्जयाय प्रयाणशङ्खो मकरध्वजस्य ॥
किं रोमराजी यमुनातटे स्मे वलिविदण्डीं कलयन्ननङ्गः ।
कस्यापि रूपेण जितस्तपस्वी तमेव जेतुं तपते तपांसि ॥

वृकोदराद्याः महसा महाश्रियः
सहोदरास्तं परिवव्रिरे नृपम् ।
चतुर्हस्तिनो हस्तमिवासुहृद्गण-
च्छिदा निदानं वनवारदावदाः ॥

पञ्चत्वं पञ्चेषोर्जगदारम्भाय पञ्चभूतानि ।
पञ्च शराः कुसुमेषोर्गिरिभुवि गिरिशस्य जयति पञ्चमुखी ॥
तवोग्रमूर्त्तिः शरभूः प्रतापे दध्रे षडङ्गस्य षडाननत्वम् ।
यत्कुण्डलानीव विरेजुरुच्चैश्चण्डद्युतेर्द्वादश मण्डलानि ॥

श्लोकेषु सप्तसु दधत्यतिगौरवं यो
येषां समा उपरि सप्ततुरङ्गमस्य ।
सप्तर्षयो घनपिषङ्गजटा जयन्ति
ते सप्त हेतय इव ज्वलनस्य मूर्त्ताः ॥

गीतं दिगन्तेषु यशोऽष्टमूर्त्ते-
र्मूर्त्तिप्रभन्तेऽष्टदिगीशमूर्त्तः ।
अष्टाङ्गयोगात् कविताष्टसिद्धिः
स्तोतुं दधेष्टश्रुतितां विधाता ॥

अन्तर्लसद्धस्तसितद्युतीनि छत्राणि लङ्काधिपतेः शिरांसि ।
न चापि लक्ष्मीर्मणिभासुराणां दधुर्नवानामपि सेवधीनाम् ॥
निजाम्बुनीरैः स्नपिता द्विषद्भिः प्रदीपिता मौलिमणिस्रजाभिः ।
दशापि ते पादनखाः प्रयान्ति दिशां दशानामपि दर्पणत्वम् ॥

इति द्वितीयस्तबके संख्यानाम चतुर्थं कुसुमम् ।

CHATTAMPI SWAMI ARCHIVE

अथ रूढ़ियौगिकमिश्राः।

रूढ़यौगिकमिश्राख्यास्त्रिधा शब्दाः प्रकीर्त्तिताः।
व्युत्पत्तिवर्जिता रूढ़ाः शब्दा आखण्डलादयः॥
योगो गुणेन क्रियया सम्बन्धेन कृतोऽन्वयः।
गुणः स्यान्नीलपीतादिर्नीलकण्ठादयस्ततः॥
संख्या अपि गुणा एव वैशेषिकमते ततः॥
पञ्चेषु षन्मुख दशग्रीवैकदशनादयः।
कविरूढ़िच्युताः शुभ्रवपुः षट्कन्धरादयः।
क्रियाकारी विप्रमुखास्ततः स्रष्टृहरादयः॥
स्वाम्ये भूपति भूपाल धनमन्त्रर्थकादिभिः।
सम्बन्धे स्वामिनो नाम कविरूढ्या निगद्यते॥
भूनेता भूपतिर्भूभुक्भूपालो भूधनोऽंशुमान्।
कविरूढ्यैव नत्वेवं भूमानं शुण्डगित्यपि॥
जन्या विधातृ कर सृ कृत् कर्त्तृ स्रष्टृ सृक् जनक मुखाः।
जनकाद्योनि जन सू सम्भव रुह भूति सूत्याद्याः॥

जन्या यथा। विश्वविधाता विश्वकरः विश्वसूर्विश्वकृत्।
विश्वकर्त्ता विश्वस्रष्टा विश्वसृक् विश्वजनकः॥

कारणादयो यथा। आत्मयोनि-रात्मजनिरात्मसूरात्म-सम्भव आत्मरुह आत्मभूतिरात्मसूतिः। आदिना वात्स्यायनादयः।

धाय्यात् प्रस्तारोऽन्याङ्कध्वजन्तन्मण्डलसमानाः।
धरभभद्दमानि सस्वथशालिशेखरसदृचाः॥
यथा शूली तथा सर्पी न शशी हरिणी तथा।
यथेन्दुमौलिर्न तथा गङ्गामौलिस्तु वाचकः॥
भोज्यादन्धःपायिलिटदुग्धपानाशनादयः।
भोज्यभोजकसम्बन्धाद्यथा सुरमृतान्धसः॥

CHATTAMPI SWAMI ARCHIVE

पत्युः कान्ता दयिता वधूः प्रणयिणी प्रियाङ्गनातुल्याः।
पत्न्याः प्रणयिधवाद्याः पतिपत्नीभावसम्बन्धात्॥
सख्युः सखिप्रभृतयो वाह्यघोनासनप्रायाः।
ज्ञातेः स्वसृतनयानुजाग्रजावरजसङ्काशाः॥
आश्रयतः सदनासिध्यासिद्धासिशयप्रकाराश्च।
वध्याद्द्विट्जिदराति द्वेषिभुक्ध्वंसिशासनविपक्षाः॥
अप्यन्तकारिसूदनदर्पच्छिद्दमनदारिमथनाद्याः।
सम्बन्धो हि विवक्षात इति पदादेकतो न संयोज्याः॥
औचित्याद्धि बुधैः प्राक्प्रदर्शिताः सम्बन्धिशब्दास्ते।
वृषस्य सति वाहत्वे शङ्करो वृषवाहनः॥
धार्यत्वे तु वृषाङ्कोऽयं सत्वे वृषपतिस्तु सः।
व्यक्तिचिह्नाङ्कितो जातिशब्दोऽपि व्यक्तिवाचकः॥
यथागस्त्यनिवासादि दक्षिणाशा प्रकीर्त्तिता।
शब्दौ त्रिपञ्चसप्तादिवाचकौ विषमार्द्धजौ॥
योज्यौ द्विविनेत्रपञ्चशरसप्तच्छदादिषु।
इतरान्तो नञ्पूर्वो गुणशब्दोऽर्थविरोधिनं व्यक्ति॥

यथा सितेतरोऽसित एव प्रतिपद्यते कृष्णः। जलदादिषु पूर्वपदेषु सरोजमुख्येषु चोत्तरपदेषु सुरपतिसमेषु चोभयपदेषु पर्य्यायपरिवृत्तिः। इति परिवृत्तिसहार्थे योग्यत्वे यौगिकाः शब्दाः परिवृत्तिसहा एते मिश्रा गीर्वार्णैस्तुल्यास्तु।

इति श्लेषस्तवके रूढ़ियौगिकमिश्राख्यं पञ्चमं कुसुमम्।

अथ राजदर्शनम्।

विप्रलापस्तड़ागादिवर्णनं वादितर्जनम्।
एते यत्र निगद्यन्ते क्रमेण कुसुमानि षट्॥

CHATTAMPI SWAMI ARCHIVE

तं वदामि कथाकल्पं सुधाकल्पं समासतः ।
अर्थिप्रत्यर्थिनोर्यत्र विमातः सा कथा द्विधा ॥
वीतरागकथान्या च विजिगीषुकथा यथा ।
वादी च प्रतिवादी च प्राश्निकोऽथ सभापतिः ॥
चत्वार्यङ्गानि तुङ्गानि सभायाः सम्प्रचक्षते ।
अनिन्द्यः सर्वविद्यासु सर्वालङ्कारपारगः ॥
सविता कवितापद्मकानने तर्ककर्कशः ।
भवते भारतेऽभिज्ञः प्राज्ञो मल्लादिनाथ वा ।
सुवेशो पुरुषो गच्छेत् सभ्यान् सम्भावयन् सभाम् ॥
अथ प्रथमतस्तत्र धरणीभरणं प्रति ।
विद्वद्वृन्दप्रमोदार्थमाशीराशीनुदीरयेत् ॥

स्वस्त्यस्तु विश्वारियशःप्रशस्तिभ्राजिष्णुदोष्णे भवतेऽवते क्ष्मां ।
विपक्षलक्षक्षमदक्षतीक्ष्णकौक्षेयकायाक्षतरक्षणाय ॥

अतुल्यकल्याणभरलब्धरवाक् ! प्राज्यसाम्राज्य ! सामादय-चतुःसमुद्रमुद्रावच्छेदिनीं मेदिनीं पाहि । प्रतापतापितारातिवर्गो भर्गोपमो भूविनायकोऽवनाय कोविदस्य भवतु भवतः । शारदाशारदाभ्रशुभ्रा विभ्राजतामकुण्ठे भवतः कण्ठे सूर्य्यः सूर्य्यार्चितः । प्रचितोपचयमचिरमारचयतु त्वाम् । अमन्दानन्दचन्द्राय मन्दाकिनी सम्पाद्यताम् । भृङ्गीशभृङ्गारशृङ्गारकारिवारिभासुरापगा गात्रमतिमात्रमत्रभवतो भवतः परिश्रयतु । सर्वतः पर्वतसुतापतिः पातु । गङ्गाशृङ्गारितशिराः शिवः शिवं दिशतु देवाय । सर्वमङ्गला सर्वमङ्गलास्पदास्पदं विदधातु भवन्तम् । प्रभविष्णुर्विष्णुः पुष्णातु जिष्णुतां तव । स दामोदरः सदामोदरतस्त्वयि भवतु । त्वयि करोतु करुणामरुणानुजध्वजः । मुकुन्दः कुन्दवत् सुन्दरयशस्तारकिताम्बरं विरचयतु त्वाम् । जायतां निजाङ्घ्रिभवभुवने त्रिभुवनं भूषयन्

भगवान् भवदभ्युदयाय। जीव जीवभूरिव भूरिवत्सरशतानि। चिरं विरिञ्चिरिव वञ्चितकाल! कलय पुष्कलमायुः। अरविन्द-नन्दनो मुदं समुदञ्चयतु। निराविलमिलावलयमाहिमालय-मापालय। जय प्रबलरिपुकुलप्रलयकालाग्निरुद्र! अनन्त-गुणमणिगणसमुदय! समुद्रविगणगणेय! द्रविणतृणीकृत-गीर्वाणवृक्ष! भरत-भगीरथ-सुरथ-दशरथ-रघु-सदृक्ष! विनय-विनमदवनिधवनिवहसुवहचरणचामीकरारविन्द! सहृदय-हृदयक्षीरोदमोदमानगोविन्द! रुद्राणीरमणचरण-सम्पन्न! समस्तसामन्तसीमन्तिनी-सीमन्त-सिन्दूर-पूरण-सारण-कारण! निष्कृप--कृपाण--धारावलुप्तदृप्तमेदिनीपति-मुण्ड-मण्डलीपति-मण्डित-चण्डीशमूर्त्तिमण्डल! वरवदरीवनाचलदलनलीला-खण्डल! अतुल-तुलापुरुषप्रमुख-प्रतप्यमानमहादानसन्तान-सन्तोषित--सर्वभूसुपर्वप्रणीताशीर्वादनादप्रमोदमानमानस! यशो-राजहंसोल्लास-लीलानिवास! मानससम्भोत्तम्भितासि-दम्भोलिलीलादलितारिदन्तावलावलीमुक्ताफलोज्ज्वलितराज्य-लक्ष्मी-रमण! दक्षिण! दोर्दण्डहिण्डीरपिण्डपाण्ड-राखण्ड-यशःश्रीखण्ड-मण्डितगजदण्ड! विलसदवनीयक! दारिद्र्यमुद्राविद्राविद्रविणधाराधर! तृणतर्जितोर्जितधनुर्धर! अङ्ग-वङ्ग-कलिङ्ग-तुलिङ्ग-तैलङ्ग-मगमगध-मलय-मालव-कुरु-म रुणाचीर-सौवीर-काश्मीर-हरिकेलकेरल--कोशलान्तर्वेदिचेदि-महाराष्ट्र--लाट-भोट-चावांट-वराट-करहाट--कर्णाट-गौड़चोड़-द्रविड़ानर्त्त-नृत्यत्कीर्त्तिनर्त्तकीनिरूपणनिपुणगीर्वाण-गणस्तूय-मान! दोस्तम्भ-सफल-सकल-समारम्भ! चातुर्य्य-माधुर्य्य-धैर्य्य-स्थैर्य्य-सौर्य्य-सौन्दर्य्य-सौकुमार्य्य-मर्य्यादा-दयानयाचारदा-क्षिण्यताल्पक्षामक्षितिपति-गुणग्रामाभिराम! अनवरतसुकृत-कृतानुकृतवत्स! अमन्दमान्दोलदोलायमानोद्दाम! कमला-

विलासवासभवन! भवनगरनाथ! मधुमथनचरणस्मरण-परिणतपुण्यजन्यानन्य-सामान्यवैभवाधिवास! सविकाश-हरहासव्यासोपन्यासमङ्गाशवाग्विलास-निवासकालिदास! धवलधामाधिरूढ़! समूहशृङ्गारप्रौढ़प्रमदामोदामदालसाविल! सन्वयनवाजीराजीवजीवन! भुवनजनमनोमनोहर! मधुकरशङ्किकीतकीवन! जय सभयजनशबल! जय कमलसमचरण! जय भरणधरणिभरधरण! जय मदनमदहरण! देवं नयनमनोऽभिरामं वाममिव लोचनगोचरीकृत्य कृतकृत्याः प्रशान्तखरदूषणोपप्लवा दण्डकारण्यभुव इव समजनिष्महि। अयं हि सम्प्रति प्रवृत्तो देवस्य साक्षात्कारसंसारमरुसञ्चारसम्भूतप्रभूतखेदानां तापत्रयातपतप्तानामस्माकमकस्मादजनि सुधाकादम्बिनीकदम्बसम्बन्धः। अनेन वसुधाशीकरिपरिष्यन्दिनामिवाकाशजलदेन निर्वापितानि सर्वतस्तापतप्तं शरीरमन्तराणि च करणानि। किं किमस्माभ्यं नोपकृतं? कानि कानि सौख्यानि नोपनीतानि? काः काः सम्पदो न सम्भाविताः? केषां केषां कल्यानां न भाजनीकृताः? किमनल्पजल्पकल्पनया? निःशेषमहोदयानामतिभूमिमध्यास्महे। देवः प्रार्थकसार्थकं प्रति प्रतिनिधिः। देवं देवेन्द्रचन्द्ररुद्रोपेन्द्रद्रुहिणमुद्राधरं सत्याश्रयं नासत्याः श्रयन्ते। देवेन पवित्रचरित्राणि मित्राणि पुरस्कृतानि। देवाय सेवायतयत्नं द्वाःस्थदुःस्थीकृतं सामन्तसहस्रमजस्रं स्पृहयति। देवाद्दवाधिपादिव त्रस्ताः समस्तावनिभृतो विश्रुतोपक्रममपाक्रामन्। देवस्य निर्दोषः कोषः पोषयतु मनीषिमनीषितम्। देवे च प्रसादसुमुखे संमुखीसम्पन्ना सेमुषी। अपिच। देवस्य महीमहेन्द्रस्यापि सुरसद्मपद्मेव भ्रान्तस्थितेर्बहुलनयनलाभस्य सहजन्यायालोचनसन्नो-

हारिणः करसम्भृतशतकोटिरत्नभुजः सन्तानमालभारिणः कनकाचलरुचिरुचामरराजिविराजितस्य स्वयम्भूमहितस्थितेः काञ्चनशोभां दधानाः सुधर्मासभासभासदः सुसमःकाव्यमनोज्ञं चरितं सखाप्रवरः प्रणयिनः मुखलीलागन्धर्वागुरुन्वत्तिरम्भासम्भावितं सदानन्दनमुद्यानम्। अहो वैचित्र्यमत्र जनपदाः सदानयज्ञानीतयश्च। उपचितव्रीहयो विग्रहामहावर्णा इवान्योदयोल्लासिनः। बहुखलाः सज्जनालङ्कृताः। लब्धसन्निधाना वैदूर्य्यभाजः। नितान्तप्रणता उन्नताभाजः। कुलीनाः सदानभोगाः। मन्त्रिणः सदाचाराः। मातङ्गाः स्पृहनीयदानाः। भुजगवलया दत्तमखयुषः। भूतिभृतो रजोरहिताः। सुकेशानिष्केशाम्। परिजनः कलानिधिर्न दोषाकरः। दानं समानमसमानम्। किञ्च किञ्चनवचनमुच्यमानमधुनासधुसमानमधुनामधुनावतारः क्षणमवत्वावतु च। तथा चामी चामीकराचलवदचलाः कलाकलापमण्डिताः पण्डिताखिलविपक्षपक्षाः। क्षामन्तनाममामकं चापलं विचारयन्तु च मया निरुच्यमानमुचितमनुचितं वा। यदेते सदसद्विचारचातुरीचतुराश्चतुरानना इव शिवप्रसादासादितमहितमहिमानो मानोन्नतान्तेवासिवासालोचितव्याख्याः। संख्यावद्गणनायां पाणिनीया इव गणनीयाः। सकलदिक्ललसतुलीस्तनकपोलस्थलमण्डलायमानयशः। प्रसरद्दुर्व्यपोहमोहमहान्धकारप्राग्भारसंहारभास्कराः। कलिकलुषकालकूटकवलनकलाकलितनीलकण्ठावताराः। अमन्दमन्दरगिरिपरिक्षुभित-क्षीराब्धि-मध्योच्छलत्कल्लोल विमल शुक्तिमुक्ताकलापालङ्कृतकण्ठनालाः। अनेककलाविलासोपहसितभसितकलकलानिधयो निरवद्यविद्यानद्याश्रयपयोराशयः। संसारसारसारस्वतस्वतःप्रकाशभाष-

CHATTAMPI SWAMI ARCHIVE

माणसमानवाग्ब्रह्माणश्चतुरुदधिमेखलाखेलदुच्छृङ्खलकीर्त्तिनर्त्तकीकाः सकलकलाविलासभाजनसभाजना इह विभ्राजन्ते।

इति तृतीयस्तवके राजदर्शनं नाम प्रथमं कुसुमम्।

अथ गङ्गास्तुतिः।

देवस्योपासनावासनाशासनासमाकृष्टाः सत्वरा गत्वरा अपि वयं प्रलम्बविलम्बभाजो यदभूमभूमहेन्द्रस्तत्र हेतुमाकलयत। अत्रामद्राक्षामण्डपमण्डितस्य पचेलिमफलास्वादमोदमानजनपदस्य विकसदमलकुसुमसमूहसौरभ्यलुभ्यदलिकुलकलितललितक्रीड़स्याक्रीड़स्य मध्ये चलदलशालतमालतलशिलातलकलितनिष्कम्पपद्मासनं निश्वासनिःस्वनश्वाससाग्रजाग्रन्नेत्रविभागनिःस्यन्दमानसम्मदोदविन्दुपानपीनचकोरचयरचितपरिचयं काषायसिचयं रागारिदारिद्र्यानासिचयं निखिलोपनिषद्विषयमानसं परमहंससंसदासजदवतंसदुरतिक्रमव्याधिवाध्यमानजगदगदङ्कारं संश्लिष्टमष्टसिद्धिभिरमन्त्रं मन्त्राणां मित्रं मैत्र्याः कारणं करुणाया मन्दिरं मुदिततायाः सपत्नमुपेक्षायाः क्षेत्रं क्षमायाः कोषं सन्तोषस्य शैलं शीलस्य पात्रं पवित्रतायाः सौधं शुद्धबुद्धेराधारं धीरताया गुरुं गुरुतायाः प्रासादं प्रसादस्य निदानं चिदानन्दसम्पदामाश्रयं श्रेयसः तपसोऽप्युपासनीयं समस्यापि सम्यगवगम्यं योगस्याप्यनुयोगयोग्यं श्रद्धाया अपि श्रद्धेयं अस्पृष्टं दुष्टतया अनवगूढ़ं मूढ़तया निरस्तं नास्तिकतया वञ्चितं कुचिन्तया दूरीकृतं प्रतिग्रहेनावज्ञातमवज्ञानेन नाङ्गीकृतमनङ्गेनाक्षिप्तं दृप्ततयातिसारितं मात्सर्य्येणानिषेवितं विपर्य्ययैरलब्धं लुब्धतया वर्जितं अनार्जवेन शीलितं दुःशीलतया निर्वासितं दुर्वासनाभिरकलितं कलिना कलिनाम महिलानामिव

परिहरन्तं महामन्त्रिणं पवनाभ्याससुघटितसन्धिविग्रहं कामनया वर्जितमपि न कामनया वर्जितं निष्कोपचयमपि अनिष्कोपनिचयं स्फुटमहसं अस्फुटमहसं अनुतापकारिणं अननुतापकारिणं गिरा वनप्रियं पुरुषमपुरुषमद्राक्षं लक्ष्मभिरभिमतैरसमानं भासमानम्। अथाभ्युत्थानवेलालौलायितानन्तरं बद्धाञ्जलिर्निरवद्यगद्यपद्यमयीमयमुदाजहार भारतीं। यथा—जह्नुजे! मम शशिप्रभासिते भासिते समुकुटे सदानवे!।

दानवेन्द्ररिपुपादनिर्गते! निर्गतेर्भव भवाब्धिपारदा॥

पारदावदातवीचिनिचयक्षालितास्तोकलोकमनेकमतिशयकमण्डलायमानपानीयधारावधूतनवसुधेव वसुधेश्वरभगीरथपथप्रवर्त्तमानजलकल्लोल-मिलड्डिण्डीरपिण्डविडम्बितहरमनोहरहासे! महासेनजननि! जननरकहारिणि! निखिलदुरितदूरितत्रिभुवनभुवने! भवनेत्रानलकीलकवलितबालेन्दुपालनोचितपयःप्रदानकुशले! कुशलेखाङ्कितसमीपवने! पावनेन्दिरामन्दिरारविन्द-सुन्दरमेदुरापे! दुरापेश्वरशिरः-सञ्चारसञ्जातपरमगौरे! गौरवेशविशेषप्रभाविनिन्दितशारदजलदे! जलदेवतावगाहनक्षुभितसितच्छदनिवहभासमाने! समानिकपदप्रदेशसञ्चारिहरिणगणप्रारब्धकेलिसङ्करे! सङ्करोचिततटनिषण्णमुनिजनाकीर्णमाणमनोरमारवे! मारवेदनानभिज्ञवैखानसारचितसारसवने! अवलेह्यमानादिपुरुषवक्षःस्थलशायिकौस्तुभप्रभासमूहसिते! हसितेश्वरशिरोवर्त्तिशीतद्युतिकेतकीकलिके! कलिकेलिभवनभवनगरदाहोद्धुरधर्मानलप्रभवारणे! वारणेन्द्रावगाह्यमानघनरसे! नरसेसुषीसमुदयागोचरित-हरमौलिमालतीमालाभ्रमकरे! मकरेश्वरपृष्ठाधिशयितचरणकिशलये! सलयेन्द्रादिवृन्दारकवृन्दविधीयमानयज्ञे! नयज्ञेश्वरभार्गवाङ्गिरसवाङ्मनसागोचर-

CHATTAMPI SWAMI ARCHIVE

प्रभावे! प्रभावेश्वामृतरश्मिमण्डलाप्लवनसुरसे! सुरसेव्य-
मानसैकतसन्निधाने! निधानेश्वरशैलशिरोविहिततरङ्गे!
तरङ्गेरितनीरजोदरकुञ्जगुञ्जद्भ्रमरे! भ्रमरेणुहरणप्रवीणसम्भा-
रसम्भाविते! भावितेश्वरप्रलम्बजटाकलापे! पेशलसर्वासि-
विलासिनीघनजघनारब्धमुग्धप्रवाहाकृष्टत्रिपिष्टपविटपिप्रसून-
धवलिते! वलितेजोहारिहरिवामपादप्रहारभिदुरब्रह्माण्ड-
भाण्डमण्डपमध्य--राजतैकस्तम्भायमानमहाप्रवाहशोभितजग-
दीप्सिते! दीप्सितेप्सितलोकप्रदानपटुतटनिविष्टसन्तुष्टनैष्ठिक-
गोष्ठीस्तवाविर्भूतवासवे! वासवेतसनिकुञ्जनिषण्णकिन्नरमि-
थुनोपगीयमाने! गीयमानैकपनदविलासनोद्धुरतरवारि-
धाराधारे! राधारेवतीपतिसमाराधितकलिन्दकन्यापरिरम्भ-
णावासहरिहरकायशोभे! यशोभेशप्रकाशनाशितदुरिता-
न्धकारविसरे! विसरेखायमानहरशिरश्चन्द्रचुम्बनचटुलचक्र-
वाकजलव्यतिकरीहृतसगरपार्थिवकुले! वकुलेन्द्रद्रुमादिद्रुम-
च्छायानिशनिषण्ण--कुरङ्ग--कुलकवलीक्रियमाण--तीरकमले!
कलमेखलानिनादानुवादिराजहंससरसितोल्लासितविपुलपुलि-
नजघनके! घनकेतकीवनपवनान्दोलितनीलोत्पलकुन्तले!
कुन्तलेलिहानभीषणसमरार्णवसन्तरणप्रवीणदैतव्रतनिपीतकु-
चकलसे! कलसेबालमञ्जरीग्रामनामसतिमिरनिकरवि-
राजमानप्रवाहभूषितमदनदहनमस्ते! नमस्ते महोर्मि-
जिताहीनभोगे! नभोगेयकीर्त्तिंलसद्विप्रसिद्धे! प्रसिद्धेस्तु
गङ्गे! मुदे! तेऽम्बुधारा सुधाराधिते! दत्तसन्तानभोगे॥
नभोगे खलाशीविषातंकवीशः कवीशस्तवेमं स्तवं व्याततान।
तवानन्तकीर्त्तेः कलाभाजनानांजनानांशिरोदामदेवेश्वरेऽपि॥

इत्यभिधाय विरराम। इति तृतीयस्तवके गङ्गास्तुति-
र्नाम द्वितीयं कुसुमम्।

CHATTAMPI SWAMI ARCHIVE

अथ भगवत्पादानुभाषणम् ।

अथ विहितस्तवस्यास्य भ्रूसञ्ज्ञया पुरुहूताज्ञयैवाहूताः सविनयमुचितोपचितामेतां वाचमवोचाम: । नमः कमला-कामुकाकारावतरणेभ्य: श्रीचरणेभ्य: । सम्प्रति प्रसादप्रसादत: संसारगुल्मरुमरीचिकारोचिकां तृषातृषापगमभाज: सुधा-सागरमगाधमध्यमवहिर्वाहनकृतात्मसंवाहनो ज्ञानदर्पण-कृतनिर्यापण: सद्यो याज्ञवल्क्यवाक्यमाशिश्रिये । अधुना धुनाना पापानि सुरधुनीह्राध्वनीनतामयासीत् । अतोऽस्माकं न भविता भगवन् ! भवन्मुखमुखावलोकनात् उत्तारिता तुच्छकृच्छ्रोच्छ्रायनिकायस्य कायस्य फलमविकलमवापाम: । भवानेको भवानेकोपपातकव्रातकरभकुल-निराकुल-कवलन-कठोर-कण्ठीरवो भगदागमनप्रसङ्गो गङ्गाप्रवाह इवात्र प्रायेण प्रवर्त्तते । युष्मद्विजयव्याजेन राजीवजन्मासन्मार्गो-पदेशायास्मै समाजिह्वीतेस्म । उन्निद्रश्चन्द्रो वागत्य धरणी-सरणीरमृतसारणीभिरभिषिषेच । किं बहुना भवादृशानां दर्शनमेव दारुणदुरितदारणम् । सम्भाषणमेव निखिलोप-क्लिषक्लिषेवणं स्पर्श एव स्पर्शाश्मलाभ: शुश्रूषैव ब्रह्मशुश्रूषा सन्निधानमेव सन्विधानं समाराधनमेव समाराधनं तवद्य-निरवद्यं तिथिरतिथि: श्रेयान्स मुहूर्त्त: समपद्यत । माता-पित्रो: पवित्रोऽन्वय: प्रतिष्ठा निष्ठामवाप । नित्यकृत्यानि कृतकृत्यानि नित्याभ्युदयचयभाजो वयं यद्यपि कृपामृत-सृषा दृषा अभ्यङ्क्ता: कृतार्थास्तथापि वाचालतावाचा-लत: काण्डमकाण्डं ताण्डवयति । भगवत्परित्यागादकृश-क्लेश: कतमो देश: कृत: ? स्वच्छन्दमागच्छद्भिरच्छधीभि: के के वाश्रमागतश्रमागतविश्रमादक्लियन्त । कियतीयती-

स्वराणामजनि जनितः प्रभृति विमला वर्णमाला। अमन्द-वन्द्यपादानां साधुमाधुकरी भिक्षा पीयूषकक्षामनूचानचय-गृहेषु ग्रहिष्यति किमु कथाभाग्यभाजो भवने भवने-पथ्यभूताद्यापि भविष्यत्येकभिक्षा। अन्यच्च। श्रीमतां वेदान्ते वेदान्तेवासिप्रभृतिभिरेव जनो भगवन्महिमानं मीमांसानिः-सीमां सम्प्रति प्रतिपद्यामहे महेच्छानाम्। भगवदुप-न्यासाद्विहितकणादानुवादाच्चपादानुवर्त्तिन्यो विद्याः प्रसिद्ध-बौद्धप्रयुक्तकुतर्ककर्कशशरेभ्यो न बिभ्यतीत्यभ्यर्हिताः प्रकाममा-मनन्ति। संख्ये संख्येयसंख्यावत्संख्यायां मुख्यतया लिख्यन्ते लेखैरपि युष्मादृशाः। आपातप्राञ्जलपातञ्जलजलधिरञ्जलि-नाकलितः कलितमोहारिभिः। गुणानां साहित्यं साहित्य-माद्धाति धातृतुल्यानाम्। तत्तद्रसप्रसवित्वं कवित्वं बिभर्त्ति कीर्त्तिमतामित्यनुशुश्रुम। अतएव युष्माभिरनूष्माभिषङ्गैः समं सविस्मयाः समगंस्महीत्यभिहिते विहितयथोचितानुवादे प्रदक्षिणाचरणप्रणामादिना सप्रसादे प्रसादे तदनु तदनु-ज्ञया ततस्तीव्रमनुव्राजिष्म।

इति भगवत्पादानुभाषणं नाम तृतीयं कुसुमम्।

अथ विप्रसम्भाषणम्।

अथ दक्षिणेन क्षोणीप्रतिमार्गं भार्गवमिव परशुभोल्लासित-ममृतसञ्चारमिव कुण्डलसल्लक्ष्मीकं वशिष्ठमिव शिष्टश्रेष्ठं परा-शरमिव पराशयज्ञं वेदव्यासमिव वेदव्यासोक्तं शुकमिवा-शुकलितपरमार्गं दुर्वाससमिव दुर्वासनाशून्यं जमदग्नि-मिव ज्वलदग्नितेजसं गर्गमिव भर्गभाजं कश्यपमिव वश्य-

CHATTAMPI SWAMI ARCHIVE

परमेन्द्रियम्, गौतममिव श्रौतमतप्रवर्त्तकम्, विश्वामित्रमिव विश्वामित्रम्, अत्रिमिव सन्निप्रवरम्, गुरुमिव क्रतुक्रियाकोविदम्, कुत्समिवाकुत्सचरितम्, वत्समिव वत्सलम्, वालिमिव जीवालिदयालुम्, तरुणायमानकरुणारसनिर्य्यासपीयूषवर्षिभि र्दृगञ्चलैरुदंचयन्तमिव चन्द्रचक्रवालम् । ईषदुन्मिषद्दशनच्छलेन स्वच्छमाशयं प्रकाशयन्तम्, उपमठपठदकुण्ठकण्ठवैकुण्ठभक्तविरक्तप्रव्यक्तोक्तसूक्त संसक्तचेतसम्, ऊर्द्ध्वरेतसम्, अजिह्मम्, ब्रह्मिष्ठं ब्राह्मणं सम्यगुपगम्यैतद्वादिषम । श्रीमन्नमस्कुर्महे महेशमहसामत्रभवतां विहिततीर्थसार्थकसञ्चरणौ चरणौ, भवांश्च चतुराननोऽप्यनष्टश्रुतिः, पुरुषोत्तमोऽपि न मायावल्लभः, गिरिशोऽपि नास्थिरचित्तशोभस्ततो न कस्य नमस्यः? भवतः कलानिधेरनुपाधिरियं चातुरी यच्चतुरचन्द्रकान्ताननं सुरोचितं वचनपीयूषं वर्षतीति निरवद्यालापपद्यामनुसरामः । एकः सातिरेकविवेकः केषां विदुषां परिषदि न गण्यसे? पुण्या शेमुषी आसीद् यास्मदीया दिष्ट्या प्रेक्षावन्तं भवन्तं प्रति सा पूर्णा न किमप्यवेक्ष्यमपेक्षते । यद्यप्यनवद्यविद्याविद्युदुद्योतोद्योतितमेदिनीमण्डलानामविकलां कलयामः कुशलतां कुशलतां दधतां श्रीमतां, तथापि मुदा सदाचारस्वच्छा पृच्छासौ विधीयते । भव्यमव्याहतचित्तानाम्, कच्चिदाचारचातुरीतुलितचिरपुरुषरत्नानामिव नगरी गरीयसी सदावदातभवदवस्थानात्? उत कुतोऽप्यागतं वतंसभूतैर्भूतलस्य? कियन्तः श्रीमतामिहाग्रहारा धराग्रहाराः शालिशालिनः? कश्चिद् विपश्चिद् यजमानो भवन्मानोचितो वर्त्तते? कीर्त्तिमतां प्रतिग्रहं जहति महति यत्र महितमहिमानो गृह एव निगृहीतेन्द्रियग्रामैरव्ययमवस्थीयते? किंवा क्वापि कदापि

गम्यतेऽनवगम्यतेजोभिः? कस्मिन्नप्यवसरे नरेश्वरावासं प्रति सम्प्रति याचा क्रियतेऽन्यत् क्रियते वा? तत्सम्बन्धाः कति? प्रतिदिनं स्नानानि भवन्ति शुभवन्ति? माध्यन्दिनं कर्म निर्ममे निर्ममेह्नितैर्भोजनमजनि रजनीकरनिकरनिभं शुभयशसाम्, उत विचक्षणानां क्षणादुपरि परिचितिर्भविची? भोजनस्य कस्मिन् कस्मिन् वादिगिरिविदारणदारुणकुलिशास्त्रे शास्त्रे मेदुरास्फुरत्यादरोदरोन्निद्रतामरसोदरपत्रसोदरनेत्राणाम्? कापि व्याक्रियते व्याख्या, उत व्याक्रियते किमपि? अत्यहमहं यथा भवदवलोकनादासादयामो दयामोदितमनोभिः सुमनोभिस्तथा विधेयम्। इत्यस्माकमाकर्ण्य कर्णरसायनं वचनं तैरपि कपिलमुनिकल्पैरनल्पजल्पजलधरध्वनिमधुरगम्भीरतारभारती प्रतिशब्दमुखरितमन्दिरोदरमिदमुदीरयामासे। सुचिरमपरिचयवशादसाम्प्रतं साम्प्रतं पौर्वापर्य्यविपर्य्ययाद् यत्किञ्चिदकस्मादस्माभिरभिधीयते, तत्र पवित्रगुणगणै दूषणगणग्रहणग्रहिलैर्न भाव्यं भावव्यञ्जितमहितमहिमभिर्महाशयैः। नयनयोरमितमस्तुतद्रवं स्रवन्तः के भवन्तः? अभिवादये। दयेन्दिरामन्दिरायमाना हृदयारविन्दान् युष्माननूनायितान् सम्यगागम्यताम्। नितान्तं पवित्रचरित्रैरिहोपविश्यताम्। दृश्यतां दधानैर्गुणनिधानैः सर्वतः शर्मस्वधर्मकर्मनिर्मलमनसां सुमनसाम्। कुतः कुतर्ककर्कशसम्पर्करहितैरिहायातम्? गृहादागम्यते रम्यतेजोभिरुत कुतश्चिद् विपश्चिद् वरेण्यैरन्यतः? अत्रागमनेनायं ग्रामो गुणग्रामोपचितः। कदा विरचितः परिचितकलकल्पैः? किं नाम नामनिकासनिर्मलमतीनाम्? विहितविद्वज्जनवृजिननिर्वासः क्व वासः क्वतः? क्वतत्रैरयं संवसथः कियन्ति वासराणि करणीयः? किं किमधीतं सुधीभिः? किं किं

च पुस्तकमस्ति स्वस्तिमताम्? निर्मितामितखेदच्छेदः को वेदः कोविदैः पठ्यते? का वा शाखा निशाखानुकम्पिनी? को देशः पेशलप्रकृतीनाम्? अदूष्याः पोष्याः कति सन्ति भवतां शुभवताम्? कति भार्य्या आर्य्याणाम्? बहवः पुत्राः, किं हित्रा एव देवकल्पाः? कियन्त्यः कन्या विश्वाधिकन्याय-भाजाम्? जनयित्रीजनकौ जनकौतुकदायिचरितौ, किमासाते वा कीर्त्तिशेषपदं निःकपटम्? कियन्ति दिनानि यावदावयोः किमिति दर्शनजनिर्नाजनि अयाचितम्? भृशं बलं शम्बलं किं चास्ति नास्ति वा? कथं निर्वाहो हव्य-वाहोपमतीव्रतेजसां बोभवतीति, भवभीतिजुषां विदुषां नित्यं कर्म हर्म्य एव निर्मीयते निर्मलमनोभिरथवा पुष्कल-पुष्करे पुष्करिणीतटे? एकवारमाहारः सारभूतः प्रभूताज्यः प्राज्यव्यंजनो भवति, द्विर्वा? प्रथमं सन्तर्पितनभोजनं भोजनं कियत्यां वेलायां सम्पाद्यते? अत्र मैत्री धात्री द्विविषदां केन केन समं? समन्ततो विशदपदकदम्बबन्धोपसंस्कृतं संस्कृतं श्रीमता श्रुतमेवास्वच्छन्दममन्दच्छन्दःसन्दानितनितान्त-कान्तकविताकान्तारे गीश्वरति। आत्मकृतिः कृतिचरैः क्वापि पठ्यताम्? अव्यग्रसमग्रगुणग्रामैर्ग्रामान्तरगतमासीत् चमासीमन्तमणिभिः? अथवात्रैवास्थायिस्थायिकीर्त्तिभिः कियन्ति तीर्थानि प्रज्ञाऽवज्ञातगीर्वाणगुरुभिरवीचितानि? कियन्ति चातिमात्रपवित्रया यात्रया निर्दमैः सम्भावनीयानि? भवतां भक्तिः शीतकिरणाभरणे भृङ्गिणमवगणयति किमुत कौस्तुभविभूषणे विभीषणं विशेषयति? सम्प्रति प्रतिभाजुषां जिगमिषैव लक्ष्यतेऽवलक्षयशसाम्। अस्मन्मनीषितमखिलमेव पूर्णमासीत् पौर्णमासीहिमांशुमांसलकीर्त्तिमतां भवतामव-लोकनेन। इति निष्प्रतिममतिभिरभिहिते यथाप्रश्नं लोको-

CHATTAMPI SWAMI ARCHIVE

त्तरैरुत्तरैरनुमोद्याभिवाद्य च वाद्यवेक्षणाकाङ्क्षया निरगाम्भि समगामि च, स्वामिसमीक्षणप्रतिक्षणविजृम्भमाणकल्याणभरैरस्माभिः।

इति तृतीयस्तवके ब्राह्मणसम्भाषणं नाम

चतुर्थं कुसुमम्।

अथ तड़ागादि वर्णनम्।

अथ क्वचित् कुवलयावलीमिलितपुण्डरीकखेलव्याजविजृम्भमाणप्रयामपरभागं तड़ागं साकाङ्क्षमीक्षमाणाः क्वापि करकमलकलितजलधौतकलधौतकलशविलासधरपयोधरभरावनम्रनागरीमरीयःस्वेदच्छेदमेदस्विनीं समीरसमीहितसमीपां वापीं नेत्रपात्रीं कृतवन्तः। क्वापि कूपान् भूपानिव गुणिभ्यः पात्रेभ्यः पावनजीवनदायिनो निरन्तरं निरूपयन्तः, कुतश्चित् पार्वतीपतिपदपयोजपूजनप्रयोजनविशुद्धाभिजननिवासनिर्वासिताशेषकल्मषोपसमं दुर्गं नयनमार्गं नयन्तः, अपरत्र च भवदुक्तस्फुटप्रतिभटहाटककपाटरचनासनाथं गोपुरं च परिचिन्वन्तः, अन्यत सुपर्वपर्व्वतमर्व्वसर्वङ्कषाभिभाभिभालयन्तः, इतरत्र जवविजितकुरङ्गांस्तुरङ्गान् रङ्गागताबटानिव नृत्यतो निरीक्ष्य वीक्षणयुगलं सफलयन्तः, क्वचिद्गजवल्लिवेल्लनोल्लासितभास्वत्तुङ्गतुरङ्गगमनानि नयनमीनयोरानायतां नयन्तः, क्वचन काञ्चन काञ्चनवर्णां कर्णान्तविश्रान्तचारुलोचनां चलां चरणसञ्चरणसिञ्जानमञ्जुमञ्जीरनादेन नेदीयसां हृदयमदयमपहरन्तीमचिलमीकुर्वाणा निर्वर्ण्य निर्वाणागारलाघवं द्राघयन्तः, वसुमतीसारं देवद्वारं समासाद्य माद्य-

दन्तःकरणाः समवर्त्तिष्महि। अनन्तरं निरन्तरमपक्रम-निष्क्रामदनेकसेवकनिकायकायसम्बन्धं सनिबन्धं परितः परिहरन्तः, सन्तमसराशिनाशिप्रचण्डमार्त्तण्डमण्डलसप्र-काशमाकाशसङ्काशं देवसकाशमनायासमयासिष्म। सम्प्रति च न कंप्रति प्रतिभाविभासितवदना वादिन आवर्जिता जर्जरकर्णकलशीकाः प्रेक्षावन्तः प्रतीक्षन्ते चास्मदप्रह्वजिह्वा-शुक्तिमुक्तां वाचो युक्तिमुक्तावलीम्, तदचिरस्य निरस्य सर्वगर्व-मेतस्य भगवतीं भारतीं कण्ठपीठाधिष्ठायिनीं निर्माय निर्मायिमुपास्य च विपास्यमध्यवस्यामि पुराणपुरुषो-त्तमस्य देवस्य विचित्रां स्तोत्रावलीम्।

इति तृतीयस्तवके तड़ागादिवर्णनं नाम
पञ्चमं कुसुमम्।

अथ वादितर्ज्जनम्।

इत्यादि वादिमान्याय वचांस्युच्चार्य्य धैर्य्यवान्।
प्रतीक्षेत विपक्षस्य भारतीं प्रातिकूलिनीम्॥
ततः संरम्भसम्भारगम्भीरारम्भनिर्भराम्।
विपक्षं क्षिप्रमाक्षिप्य वाचमुच्चारयेदिमाम्॥
यन्मया सह दुर्बुद्धे! वाग्युद्धं कर्त्तुमिच्छसि।
तत्पङ्गुर्भृङ्गमुत्तुङ्गं मेरोरारोढुमिच्छसि॥
सुप्तसिंहसटाकृष्टिमष्टापदपदच्छिदाम्।
व्याघ्राय शीघ्रमाघ्रातुं शशकः सत्यमीहसे॥
शुकभावः श्येनादस्य चञ्चुं चुम्बितुमिच्छसि।
सर्पं सदर्पमङ्घ्रिभ्यां निष्पेष्टुं दुष्ट! वाञ्छसि॥
मण्डूकखण्डतां धत्से कुक्षितो नागसंसदि।
श्रीखण्डखण्ड एरण्डः स्वसौरभ्यं स्नुषे उषे॥

CHATTAMPI SWAMI ARCHIVE

सम्प्रहर्त्तुं विषाणाभ्यां शक्रेभं वृषभेच्छसि।
गिरिं पातयितुं दन्ती दन्ताभ्यामिव वाञ्छसि॥
दुर्बुद्धे ! स्पर्द्धसे कीटः प्रकटं कैटभारिणा।
आखुर्बिडालदशनानुत्पाटयितुमिच्छसि॥
इदं पाषाणदलनमम्भस्यालेख्यदर्शनम्।
मृगतृष्णाम्भसि स्नानं कृष्णाहि-मुखचुम्बनम्॥
तुलया तोलनं मेरोः करेण स्थगनं रवेः।
खड्गधाराग्रसञ्चारः शिरसा गिरिभेदनम्॥
नभसोऽङ्गुलिभिर्मानमयश्चणकचर्वणम्।
अङ्गारशयनस्वापो मज्जयोऽयं त्वयेष्यते॥
राजिलो गरुडं द्वेष्टि खद्योतोऽर्कं जिगीषसि।
कूपः संस्पर्द्धसेऽम्भोधिं मृगः सिंहं जिघांससि॥
खःशाखिमञ्जरीं भूस्थः करेणाक्रष्टुमिच्छसि।
त्वं शेषशेखरमणिं हठेनादातुमिच्छसि॥
स्वर्दन्ति-दन्तैस्ताटङ्कं वतंसं गरुडच्छदैः।
कृतान्तमहिषीशृङ्गोद्धरणं च चिकीर्षसि॥
त्वया दुर्वचनैरद्य दुर्वासाः परिकोपितः।
कालिकादंष्ट्रया कण्डूरपनेतुमिहेष्यते॥
सुखसुप्तस्त्वया सिंहः पादाघातेन बोधितः।
यदहं वादवचनाटोपेन परिकोपितः॥
लक्षणे मम दक्षत्वं साहित्ये संहृता मतिः।
तर्के कर्कशतात्पर्य्यं वा शास्त्रे नास्ति मे श्रमः ?॥
इत्यं सुव्यथकैर्वाक्यैरस्य दर्पाद्रिमुद्धरेत्।
अर्द्धं च शमयेद्वादी युक्तियुक्तैर्वचःक्रमैः॥
इति तृतीयस्तबके वादितर्जनं नाम षष्ठं कुसुमम्।

CHATTAMPI SWAMI ARCHIVE

अथार्थोत्पादनम्।

अर्थोत्पादोऽद्भुतं चित्रं सादृश्यं रूपकादिकम्।
समस्या-पूरणोपायः समस्या च यथाक्रमम्॥
मृण्मयकार्पासमयद्रुमसम्भवधातुचर्मदृषदां च।
वाच्या क्लेशसहत्वात् भद्रस्थानादिसम्प्राप्तिः॥ मृण्मयं यथा—

कुद्दालघात-पादप्रहार-करपीड़न-बन्धनच्छेद-चक्रभ्रमण-पाषाणपिष्टिका-काष्ठहस्तघात-रवितापशोष-वह्निप्रवेश-परीक्षार्थंशिरः प्रहारादिभिः कष्टमनुभूतम्, जनबुभुक्षातृष्णापरिहारार्थं जलधारापातेन लोकोपकारः कृतः, तैः सुकृतैः मृण्मयवस्तुनो भव्याधारादिकमारोग्यम्। कार्पाससूत्रमयी वस्तुन्येते भावा वाच्याः, यत्पूर्वं शीतवातापयायाचिताम्बुदानकर्मकरनखच्छेदनविक्रिया एवमातपक्षेपलौहोपलघर्षणतुलारोहणान्तःसाराकर्षणपिण्डाघातविदारणयन्त्रारोहणतर्कुभ्रमिआकर्षणतन्तुवायाकर्षणकाष्ठप्रहारविपणिविक्रियादिकष्टमनुभूतम्। तूलिकादिरूपतया परगुह्याच्छादनेन च शीतातपादित्राणतया परोपकारः कृतः, तैः सुकृतैः कार्पासादिमयवस्तुनो भद्रस्थानानि सम्भाव्यम्। एवमन्यत्राऽप्यूह्यम्।

लज्जा कोपोऽयशो नाश रोषाक्रन्दास्यकृष्णता।
रागपाण्डुरता शस्त्री विषभक्ष्यातपो जपाः॥
राजप्रसादहंसैक्यदण्डभक्तिनिषेवणम्।
दुःखस्नेहाभिचारेर्ष्या सहनोञ्जीविकादयः॥
वर्ण्यने विजितस्यैते पराजयसमुद्भवाः।
भावा वाच्या यथौचित्यं सर्वे लज्जादयो यथा॥
मुखेन जितं च कमलं लज्जयेऽवनतं गतम्।
कोपतप्तमिव कासारः क्षुद्रशत्रुश्च शमं भेजे॥
मूर्त्तमिवायशोभृङ्गावलिव्याजेन धत्ते।

CHATTAMPI SWAMI ARCHIVE

अथवा जलदुर्गे नष्टं रोषादिव वारुणतां धत्ते ॥
भ्रमरारवैराक्रन्दतीव नीलालिभिः श्याममुखमासीत्।
मुखेन प्रीत्या सम्भावितं कोकनदमनुरक्तत्वं धत्ते।
नेत्रजितं पुण्डरीकं चिन्तयेव पाण्डुरतां धत्ते ॥
भृङ्गश्रेणीमिषादुरसि शस्त्रीं क्षिपति ॥
भृङ्गमिषाद्विषं भक्षयति जलान्तस्तपतां दधौ।
जले आकण्ठमग्नं तपस्तनुते। [खेमन्त्रं जपति।
परागपाण्डुरां रुद्राक्षमालाभिर्बलिमालां दधत्तदा
राजप्रसादरहितं बहुकण्टकतां धत्ते ॥
हंसैः सह सङ्गतिं कुरुते अरुणदलच्छलेन।
काषायं वासो बिभ्रदवलम्बितैकदण्डमस्ति ॥
पल्वलगतमत्स्यकूर्मवराहादीन् भजते।
शम्भोरम्भोमूर्त्तेः सेवां करोति।
दुःखादिव मकरन्दाश्रूणि मुञ्चति।
तन्मित्र इन्दुकान्तिहारिणि सूर्य्ये स्निह्यति।
जलमध्यस्थमभिचारमन्त्राक्षराणीव भृङ्गान् धत्ते।
तन्मित्रे चन्द्रमसीर्ष्यां बिभर्त्ति।
भ्रमरपदप्रहरणानि सहते।
त्रासादिवोज्जीविकया भृङ्गनेत्रैणेक्षते।
भयादिव वीचिक्षोभात् कम्पते। [बिभर्त्ति।
हृदन्ति स्वपराभवामर्षानलधूमलेखामिवालिमालां
योद्धुकाममिव प्रकाशितकोशं सहस्रं पत्राणि धत्ते।
एवं चन्द्रोऽपि। यथा—
मुखजितश्चन्द्रो लाञ्छनच्छलेन पराभवाकीर्त्तिं धत्ते।
उदरन्यस्तशस्त्र इव लक्ष्यते।
महेश्वरजटाटवीं प्रविश्य क्षयी गङ्गातटे तपस्यति।

CHATTAMPI SWAMI ARCHIVE

विष्णुपदं याचते। तन्मित्रं पद्मं द्वेष्टि।
अस्ताद्रिशिखरमारुह्य समुद्रे झम्पां करोति।
दिवा न प्रकटो भवति। मित्रमनुप्रविशति।
कपोलप्रतिबिम्बच्छलेन तदनुप्रवेशं कुरुते।
विदेशं भजते। उदरताडनादिवच्छामोदरतां बिभर्त्ति।
पाण्डुरः क्षीयते। पीयूषबिन्दुव्याजेनाश्रूणि मुञ्चति।
सदार्द्रतया खिद्यति। अस्ताचले सानुचरो विलीयते।
चरणनखानुबिम्बव्याजेन शरणं प्रविशति॥

इति चतुर्थे स्तवके अर्थोत्पादनं नाम
प्रथमं कुसुमम्।

अथ अद्भुतम्।

'यत्र लिङ्गविभक्तीनां सति भेदे महत्यपि।
दृश्यते शब्दसादृश्यं तदद्भुतमितीर्य्यते॥'
इन्नन्तैः स्त्रीकृतैः शब्दै रौरी क्लीबस्त्रियोः पुनः।
तैरेव रेफपृष्ठस्थैः स्त्रीकर्मबहुता भवेत्॥
प्रभावराजिनी रागोल्लासप्रध्वंसिनी रयात्।
गौरीशश्वोः पदाब्जे च कुरुतां सुखसम्पदः॥

अत्र गौरी विशेषणे स्त्रियामौन्। पदाब्जविशेषणे नपुंसके औरी, सुखसम्पद्विशेषणे स्त्रियां शस्।

विशेषणपरिच्छिन्नैरिङ्गिते रेफपृष्ठगैः।
द्विष्ठिद्विपञ्चमीकर्मस्त्रीबहुत्वेऽपि चाद्भुतम्॥

द्विष्ठस्योभयपदिधातोःद्विपञ्चमी-परस्मैपदद्विवचने आत्मनेपदैकवचनञ्च तस्याः क्रियायाः कर्मस्त्रीबहुत्वेऽप्यद्भुतम्।

CHATTAMPI SWAMI ARCHIVE

यथा। भवभेदपटूरागध्वान्तभानुस्थितीरयात्।
श्रीमान् विश्वेश्वरो गङ्गाकाश्यौ च कुरुतां श्रियः॥

अत्र विश्वेश्वरगङ्गा काशी श्री विशेषणत्वात्, सु-श्री-शषः क्रमेण कृताः।

स्मेर पुष्कररोचिष्णूराजन्यशतशेखरः।
हरिः खड्गो गणाधीशसूर्य्यौ च कुरुतां श्रियः॥
स्मेर पुष्कररोचिष्णू राजन्यशतशेखरः।
कृपाणस्तव हस्तौ च सदा वितनुतां श्रियः॥
न्युपसर्गशब्दपृष्ठे राजीतुल्यैर्विशेषणश्चिह्नैः।
अन्ते क्रियाविशेषणसारैरत्यद्भुतं भवति॥ ८॥

न्युपसर्गाः, निहत, निमग्न, निरुद्ध, इत्यादिकाः शब्दाः। राजितुल्याः राजि, राजी। धूलि, धूली। इत्यादयः। निकामम्, नितान्तम्, इत्यादि क्रियाविशेषणसारैः। यथा।

छिन्नाघवल्ली निचिताप्तसौख्य,
राजी निरुद्धानिरुची निकामम्।
हरस्य मूर्त्तिश्चरणौ महांसि,
मा जातु गातां मम चित्तवृत्तेः॥

तथा च। अदुरितराजी निदलितकर्मश्रेणी निरुद्धरागभरा मूर्त्तिः क्रमौ वचांसि च शिवस्य लोके सुखं गाताम्।

स्फुरितसुभाषितपालीनिहतप्रत्यूहसंशयं ब्राह्मणाः।
मूर्त्तेः क्रमौ महांसि प्रभवत मुदितं वरं दातुम्॥
प्रचुरप्रभावनह्निताविच्छिन्नतपरमोदया विलासिन।
दातुं प्रभवत मुदितं वरमग्ने! रविविधू! विधिहरीशाः!॥
सुप्रभावा निबद्धोद्यत्पुण्यभावा नियोगतः।
मूर्त्तिः क्रमौ महांसि श्रीहरेर्युगचतुष्टये॥

वदनं पादौ वाचस्तव शिव! सुरभी रणाय दुरितानाम्।
विमलतनूरसिकोऽपि स्मरति स्मर-नाग-पञ्चास्य!॥
मुखाम्भोजं कुचौ क्रीड़ाः सुप्रभावञ्चितश्रियः।
राधाया यमुना-तीरे विष्णोः सुख-समृद्धये॥
हृद्यावलि-विलासेन मध्यश्रीरिव योषितः।
कपोलाविव नागस्य श्रियो गाते भवद्भुजाः॥
विन्ध्यशिखराविव शोभिता विभीषेन चन्द्रलेखा।
कश्यपार्काविव सेविताववरुणेन प्रतीची।
वनप्रदेशाविव शोभितावेणौ विलासेन स्त्री॥
विव्यसनान्तसान्तबहुवचनह्रप्रन्तयान्तलीलाभिः।
धातुचतुर्थ्येकवचनमग्रगलमलैर्महाद्भुतं भवति॥

उकारान्तो यथा—शोभितरवो वनप्रदेशा इव गायनः। एवं प्रभवः, गौरवः, विभवः। इकारान्तो यथा—उल्लसितस्त्रीकवयो नृपसभप्रदेशा इव वनम्। तेजोऽनुगतरुचिरवयोवैश्वानशा इव गात्रम्॥

अनेकपशुचयो नृपा इव देशः, भ्रमदलयः पद्मा इव कामः, विशदहृयः पातालप्रदेशा इव चन्द्रः। एवं सदासुरभयः शुभ्रकेशवलयः।

असन्तो यथा—परमहारविरिव सत्पुरुषाः वसन्तमासा इव शक्रः। एवं निविड़तमा गिरय इव गुह्य प्रदेशः, विलसदनाः पन्नगा इव वणिक्, सम्पन्नय मनाः खर्परदेशा इव राजा, सदामुनय इवासि सदयाः, खला इव तड़ागसन्दर्भा, बहुस्वर्णा राजान इव कूपः, प्रगुणितवेधाह्वारा इव वैरिस्त्रीजनः।

नान्तो यथा—अनुल्लङ्घितसीमा जलधिरिव सत्पुरुषाः, किन्त्वेषामग्रे घोषवदादयः शब्दाः प्रयोज्याः।

सान्ता बहुवचनान्ता यथा—

CHATTAMPI SWAMI ARCHIVE

बह्वाश्रितसरसः सुकविप्रबन्ध इव ग्रीष्मपथाः॥

तृप्रत्ययान्ता यथा—

सुसम्पन्नयोद्धारः सैन्यनिवेशा इव देशाधिपतिः॥

एवम्—सर्वदातारः पृथिवीपतय इव मेरीरवः बहुधातारः पृथिवीपतय इव गिरिकूटः, मृगयातारो व्याधा इव अश्वः।

धातुश्चतुर्थ्येकवचनमिति—

धातोरग्रे लुन्वस्तान्याबहुवचनैकवचनं नादि मादिलादि शब्दैः। यथा। अभवन्नितान्तम्, असरन्मानवम्, व्यचरन् लीलया।

इति चतुर्थस्तवके अद्भुतं नाम द्वितीयं कुसुमम्।

अथ चित्रम्।

एकार्थत्वेऽनुलोमप्रतिलोमशब्दाः। यथा—नयन, नर्त्तन, कनक, कटक, महिम, मरिम, करंक, कलङ्क, कालिका, कारिका, सारसा, सहास, मध्यम, करक, सदस्य, नवेन, नव्येन, तावता, तारता, ताव्यता, विभवि, केनके, कचक, क्रकच, कञ्चुकं, कामुका, काशिका, नंदनं, दमलदम्, दंतदं, दम्भदम्, दरद, लगुल, योग्ययोः, ततत्त, हावहा, प्रतदातप, वरभैरव, कलपुलक, वरकैरव, वरपौरव, तरुणीरुत, रदसोदर, नदभेदन, दम्पतीपदम्, लङ्कार्ककालं, माधव, वधमा, वल्लव, वन्देदेवं, लेखखले, रवीवीर, भानोनोभा, हंसासाहं, जीवावाजी, यमोमोय, विभुभुवि, वददव, नववन, वललव। अन्यार्थत्वे—यामा, माया; माया, यामा; विभु, बत, वद, कंपं, राधा, भावा, सुवासा, नन्दक, मालिका,

CHATTAMPI SWAMI ARCHIVE

कालिनी, मालिनी, राजते, भारती, हासिका, गगन, करञ्जा, भार्गव, कटकं, दीनरचा, महोरगा, वातापिना, पिनाकिना, सदालिका, यमराज, हरिदेव, सव्या, भो विकर्त्तन, नन्दनवन, नलकूवर, सहसात्वत, रसविभवेन, साहमिका, नवतमसंमद। एवमन्येऽपि।

भङ्गश्लेषाद्युपायेन यत् क्रियादिनिगूहनम्।
तत्क्रियागुप्तकाद्याहुश्चतुर्विधमिदं यथा॥

यथायथाचस्तकुरङ्गनेत्रा प्रिया पुरोमेघतिरोहितश्रीः।
महोदधेरङ्गदनङ्गभङ्गभङ्ग्योल्लसत्प्रेम तथा तथाहम्॥

(अत्र मेघति, दधे क्रिये)

कर्त्तृकर्मगुप्तकम् यथा—

मानकोपहते पुंसि शाश्वतीं स्थितिमाश्रयेत्।
शङ्खेभ्यो नाप्नुयात् कोऽपि देशः प्राप्नोति कं गुणैः॥

(पूर्वार्द्धे कर्तृगुप्तकम्। उत्तरार्द्धे कर्मगुप्तकम्। मा लक्ष्मीः। शं सुखम्। खेभ्यः इन्द्रियेभ्यः। कं सुखम्। गणैः)

सम्बन्धगूढम्, यथा—

बालया पृथिवी-पाल व्यलोकय तयाननम्।
तदाप्रभृति तान्निन्ये, स्मरः स्वशरवेध्यताम्॥
(ते आननमिति सम्बन्धो गूढः)

शब्दानां सार्थता येषां हीनेष्वप्यर्द्धमात्रया।
तैरर्द्धमात्राच्युतकमेवं विन्दुच्युतादिकम्॥

अर्द्धमात्राच्युतकम्, यथा—

मध्ये सूरिसभं भूरि स्वीकृता नगसङ्गमाः।
न लभन्ते नराः शोभां भानीवरविभानुषु॥

CHATTAMPI SWAMI ARCHIVE

(अत्र अनङ्गेति ङकारच्युतिः)

बिन्दुच्युतकम्, यथा—

साहसेनाश्रिता पद्मा लयेन जलदात्यये।
अर्णवस्याभिसरणे रहो मुञ्चति वाहिनी॥

(अत्र हंसेन रंहः)

मात्राच्युतकम्, यथा—

देशान्तरस्थितान् भावान् कलातीतानपि स्फुटम्।
कवलज्ञानतो योगी प्रत्यक्षानिव वीक्षते॥

(अत्र देशकालकेवलः)

प्रश्न एवोत्तरम्, यथा—

पथि कस्य हृतं वस्त्रं? स्त्री का सरसीसती?।
शालेः का सारवत्युर्वी? का मलाभ्यकरी दृशोः?॥

क्रियागुप्तकम्, यथा—

प्रातः प्रातः समुत्थाय द्वौ द्वाह्मणकुमारकौ।
निर्मलां सरसीं गत्वा प्रक्षाल्य च कमण्डलुम्॥

(अत्र प्रातः पूरितवन्तौ; प्रापूरणे आकारान्तो धातुः)

कर्तृक्रियागुप्तकम्, यथा—

नागरङ्गं फलं स्वादु छित्वा छित्वा वने वने।
वीप्सातः कथितो ह्यर्थः पठ्यते नतु बुध्यते॥

(अत्र वी पक्षिणी; प्सातः भक्षयतः)

कर्तृगुप्तकम्, यथा—

हारकेयूरवस्त्राणि रत्नानि विविधानि च।
ब्राह्मणेभ्यो नदीतीरे ददाति व्रज सत्वरम्॥

(अत्र द्रुभ्यो धनी)

गौरी-वदन-संकाशं श्रद्धया शशिनं दधौ।
इहैव गोपितः कर्त्ता वर्षेणापि न लभ्यते॥

CHATTAMPI SWAMI ARCHIVE

(इन्हा कामहन्ता)

आधारसम्बन्धकर्त्तृगुप्तकम्, यथा—

कावेरी रम्यराजीव विलसद्गन्धबन्धुना।
मधुमाससमीरेण वर्द्धते कुत्र ? कस्य ? का ?॥
(अत्र—कौ पृथिव्याम्, एः कामस्य, ईः श्रीः)

अक्षरच्युतकम्, यथा—

नतनाकिमौलिमणिमण्डलीविभा-
भर भासुराङ्घ्रिसरसीरुहासना।
तव शर्मणे भवतु भारती भृशम्
दृढ़जाड्यखण्डनदिनेश-भाततिः॥

अत्र मञ्जुभाषिणी-छन्दसि प्रतिपादमाद्याक्षरद्वयपाते रथोद्धतावृत्तम्, अन्त्याक्षरद्वयपाते नन्दिनीवृत्तम्, आद्याक्षर-द्वयपाते अन्त्याक्षरद्वयपाते च भद्रिकावृत्तम्।

एवं छन्दोऽन्तरेष्वप्यूह्यम्। तथाच—

आद्यन्तस्थायिनी नित्यं कमला त्वयि वर्द्धताम्।
अमध्यमश्च सुकृतं लभस्व वसुधापते !॥

अक्षर-व्यत्यय-प्रमुखानि चित्राणि यथा—

अहङ्कारमलङ्कारं बालिशाः कलयन्ति ये।
हलविन्यासमात्रेऽपि कौशलं कलयन्ति ते॥
पङ्कजस्य स्थितो मध्ये सत्यलोकान्तमाश्रितः।
कल्पानामादिभूतश्च क एष न पितामहः॥
तरणिं पश्य सुश्रोणि ! नाथ ! कुत्रास्ति नौरिह।
सवितारं प्रिये ! वच्मि, प्रिय ! दूरेऽधुना पिता॥
कण्ठे त्वन्नाम-रत्नानि हारयामि यदा यदा।
हारयामि तदानेदं जन्म मन्मथ-मर्द्दनम्॥
भव-सम्भव-सन्तापं हर ! संहर सन्ततम्।

CHATTAMPI SWAMI ARCHIVE

मम नाम मनागन्यो नयतो नयतागतिः ॥

पट्टिशबन्धः—

महेश ! ममता-राममवमाममरोत्तम ! ।
महत्तम ! महोधाम ! मतिस्तोम ! मनोरम ॥

षोडशदलपद्मबन्धः—

भीमकामंदमश्रीमत् सोमच्छामन्तमभ्रम ।
नमस्ते महिमस्तोम धामसोम समक्षम ॥

अष्टदलपद्मबन्धः—

न तयार्थो गिरा या न नयाराध्य ! जना वन ! ।
नवनाथ यवादीन ! नदी-वारित-यातन ! ॥

प्रातिलोम्येन स एवार्थः—

वशिनः शिव ! के ? लोके नेशाने करुणोरुक !
मदनामोह ! तिष्ठन्ति नम्रा न तव ये वत ॥

गतप्रत्यागत श्लोकः—

नन्दि-नन्दित तापच्छिद मोहामर पावन ! ।
रक्ष नाथ ! मतिज्ञेय ! ज्ञ ! विभो ! वशितां मम ॥
ममतां शिव ! भो ! विज्ञ ! यज्ञेतिमथनाक्षर ! ।
नव-पार-महामोद ! क्षिप तात ! दिनं दिनम् ॥

गत प्रत्यागतपादः—

वन्दे मन्ददमं देवं दक्षितामामताभिदम् ।
सदाभीम मभीदासमङ्गलम् विविलङ्गमम् ॥

गतप्रत्यागतार्द्धः—

रक्षमारपरित्रास ! रसालम्बनभाय ! हो ।
हीयमानबलं सार सत्रारिपरमाक्षर ! ॥

भिन्नच्छन्दः श्लोकद्वयेन गोमुत्रिका—

देवदेव ! कालकाल ! भीमभीम ! नामनाम ! ।

CHATTAMPI SWAMI ARCHIVE

मारमार ! धाम धाम ! मां समांस ! रक्ष रक्ष ॥

विषमं विषमं भुजगं भुजगम्,
वपुषा वपुषा ललितां ललिताम्।
वहता वहता भवता भवता,
जगताऽजगता म मता मम ता ॥

(तथा) मदनदाहिनि ! वीतविप्लवे !,
प्रमथिताम्बककालवले ! स्थिरम्।
नगसुतारतिरक्तहृदिस्थकम्,
न न मनोरमयामि समुन्मदम् ॥

वेदवेदान्तनिर्णीतरूपंस्तुवे,
त्वामपेताधिकल्लोलजालेश्वरम्।
योगचिन्तामभिव्यक्तनेदिष्ठकम्,
ध्यानलीनोऽहमर्द्धमितं मुक्तिदम् ॥

यमकः—सदा सदानन्दविकासितं सितम्,
दयोदयोल्लासितमाधवं धवम्।
धराधरावास मसम्भवम्भवम्,
स्तुमोऽस्तु मोदाय वृषासनः स नः ॥

समुद्गकः—निर्माति पाति विनिहन्ति च यः प्रमुक्त-
दोषं स्मरामि तमहो हरमं त कान्तम्।
भोगीन्द्रभूषितजटाश्रवणाङ्घ्रिकण्ठ-
दोषं स्मरामि तमहो हरमं त कान्तम् ॥

(तथा) पुण्यामृता वदुदरानघतोयपाता,
कोटीरगा श्रयभवानऽज ! निर्धुनीते।
पुण्यामृता वदुदरानघतोयपाता,
कोटीरगाश्रय ! भवानजनिर्धुनी ते ॥

द्व्यक्षरः—नानानुमानमननानमनाम्नुनीना-

CHATTAMPI SWAMI ARCHIVE

मेनोनिनुन्नममुनाऽनमनामनेन।
मेनेन-मानिनमुमेनमनूनमान-
मेनं नमामि न नमाम मनामिनाम्ना॥

निरोष्ठः—

लीला-कङ्काल-खेला-कलित-कलकलः कालरात्री-कलत्रः,
कालिन्दी-काल-कण्ठः शिशिर-कर-कला कन्दली-कान्त-कायः।
कैलासाक्रीड़केलिः सकलकलयिता नेत्रकीलाल रालः,
कल्याणं काल-कालः स किल कलयताच्चिःकलः काल-क्लन्नः॥

गतप्रत्यागतपादः—

भासा निध्याम-गर्हं गत्र वि(ष)विगलत्सं गमध्यानि-साऽभा (द्,
यं) द्यं वै दच्चोरुसत्राजनमऽन (म) नमनजत्रासरुच्चोदवैद्यम्।
सं तं वह्नाजिदम्भे सहमऽस (म) हसं भेदजिह्वावतंसम,
वन्देऽवं देयमत्या समन (य) नसमत्यामयं देवदेवम्॥

गोमूत्रिकाबन्धः—

पातु नाकापगा माता सुतानिव बुधातलम्।
अतुल्याकाशगायाता हिताय वसुधातलम्॥

असंयुक्तापुनरुक्ताक्षरम्—

अगूढ़ैनः कुठाराभजले! शिखफणाच्छवे!।
बी धी खं देहि झटिति थीडयाथासुखं च मे॥

द्व्यक्षरः—गौरं, गौरीगुरोरंगं, गरागारं, गुरुरगम्।
गोगं, गंगिगरं, रंगारोगरागारिरंगगो:॥

(तथा) ससुरासुरसंसारसारा, सरससारसा।
ससार सारसा, सारा, सासुरं सुरसा, सरित्॥

सर्वतोभद्रः—

रसासार! रसासारसाधिताऽहिहिताधिसा।
रताक्षताता क्षतारमाऽहिताऽस्तु स्तुताहिमा॥

CHATTAMPI SWAMI ARCHIVE

गतप्रत्यागतः—भाति रागवती या सा हरेरीशतयांज सा।
साऽजरान्तशरीरेह मायाऽतीवगराऽतिभा॥

गोमुत्रिका—नारायण! गदापाणे! धुरुषामरनाथ! माम्।
स्मराद्रेण हृदा चीणे कुरुष्व मयि नाक्षमाम्॥

द्व्यक्षरः—पापापापतिपततां पोतः पातूपतापतः।
पाता पिता पूतपपत्पतिपीततताततपः॥
नितान्तनूतनं ताततताननन्ततनून्नतिम्।
नानाननानन्तनुतं तन्नूनं नौतितो नुत॥
नागविशेषे शेषे शेषेऽशेषेऽपि संहृते जगति।
हंस्यसि कालं कालं का लङ्कालङ्घने स्तुतिर्भवतः॥

देवादे! वासुदेवाक्षयगृह! सकलानां कलानां कलानाम्,
पद्मा पद्माभ! पद्मास्ति तव परमहेला महेला महेला।
शेषे शेषे च शेषत्वमगगुरुमनन्तामनन्तामनन्ता-
पाता पातालपातात् प्रहतकितवराहोवराहो वराऽहो!॥

स्वजनककविनामाङ्कित षडरचक्रबन्धः—
(य) स्यां देशभ (वा) स्थित स्त्रि (दि)
वराट् नूनं दिवं रक्ष (ति),
(प्र) स्तावे प्रवि (भ) ज्य यश्च (दि)
तिजा नादत्तलोकत्व (यम्)।
(ति) ग्मांशुश्चिम (ट) ज्जले हृ (दि)
सता मेनः क्षयाविष्कृ (तम्),
(तम्) मोक्षा (य) भज (प्र) जाप (ति)
कृता (ति) थ्याङ्कि (यम्) संत (तम्)।

इति कविकल्पलतायामर्थालङ्कचतुर्थस्तवके चित्रं नाम तृतीयं कुसुमम्।

अथ सादृश्यम्।

वेण्या: सर्पासिभृङ्गाल्य:, केशपाशस्य चामर:।
नीलं कण्ठकलापोऽपि, धम्मिल्लस्य विधुन्तुद: ॥ १ ॥
सीमन्तस्याध्वदण्डौ च, ललाटस्याष्टमी-विधु:।
फलकञ्च कपोलस्य, चन्द्रमा मुकुर: स्थली ॥ २ ॥
भ्रुवो: खड्ग-धनु-र्यष्टि-रेखा-पल्लव-वल्लय:।
दृशोश्चकोर-हरिण-मदिरा-खञ्जनोऽम्बुजम् ॥ ३ ॥
कुमुदं नीलमम्भोजं श्रुतेर्दोला प्रपाशक:।
नासावंशस्य वंशाधो मुख-तुणीरचञ्चव: ॥ ४ ॥
तिलप्रसूनदण्डौचाऽधरस्य नवपल्लव:।
विंवफलं प्रवालं च, दन्तानां मौक्तिकावलि: ॥ ५ ॥
कुन्ददाड़िम्बवीजानि, हीरकाश्च स्मितस्य तु।
ज्योत्स्नापुष्पाणि पीयूषं, श्वासस्याम्भोजसौरभम् ॥ ६ ॥
जिह्वायास्त्वश्चलोदोला वेण्या भृङ्गी-पिकीरवौ।
सुधामधु च, वक्त्रस्य शशी पङ्कज-दर्पणौ ॥ ७ ॥
कण्ठस्य कंबुरंसस्य कुम्भौ, बाह्वोश्च वल्लरी।
मृणाललहरीशाखापाशा: पाणिपदस्य तु ॥ ८ ॥
पल्लवोऽम्बुजमङ्गुल्या: पल्लवो नखपङ्क्ते:।
रत्न-तारा-प्रसूनानि स्तनयो: कुड्मलौ घटौ ॥ ९ ॥
कुम्भि-कुम्भौ गिरीचक्रौ विल्वे मध्यस्यवेदिका।
सिंहमध्यञ्च रोमाल्यारेखा-शैवाल-वल्लय: ॥ १० ॥
नाभेरम्भोजमावर्त्तं ह्रदौ विवरकूपकौ।
त्रिवल्या वीचि सोपान-नि:श्रेण्यो जघनस्य तु ॥ ११ ॥
पुलिनं पीठफलके नितम्बस्य स्थलं पुन:।
ऊर्वो: कदलिका-स्तम्भे मकरौ करभस्तथा ॥ १२ ॥
जङ्घायुगस्य तु स्तम्भौ गतेर्हंसमतङ्गजौ।

CHATTAMPI SWAMI ARCHIVE

इमान्यन्यान्यपि स्त्रियोरुपमानं यथोचितम् ॥ १३ ॥
पुंसोऽङ्गैरुपमानानां विशेषः कोऽपि कथ्यते ।
स्कन्दस्य वृषरक्षाचस्कन्धोवाहोरहीश्वरः ॥ १४ ॥
हस्तिहस्तपविस्तम्भार्गलादण्डाश्च वक्षसः ।
शिलाकपाटौ यानस्य प्रमत्तोऽचगतिः पुनः ॥ १५ ॥
एकैकेनापि धर्मेणोपमानं बहुधा भवेत् ।
धर्मा वर्णक्रियाकाराधाराधेयादयो मताः ॥ १६ ॥
अभ्यासः स्याद्विभक्तीनामुपमानोपमेययोः ।
उपमावाचकानाञ्च धर्माणाञ्च विपर्ययात् ॥ १७ ॥
विपर्ययादिति सर्वत्र सम्बध्यते ।

विभक्तिविपर्ययादभ्यासो यथा—

स विपक्षान् प्रचिक्षेप तमस्तोममिवार्यमा ।
द्विषन्तं नाभियुध्यन्ते ध्वान्तोद्भेदा रविं यथा ॥ १ ॥
रविणेवान्धकाराणि तेन विक्षिपिरे द्विषः ।
द्रुह्यन्ति दुर्जनास्तस्मै धूका इव विवस्वते ॥ २ ॥
लवसुः शत्रवस्तस्माद् यूका इव दिवाकरात् ।
तमोवद्रिपवस्त्वस्तास्तस्यार्कस्येव तेजसा ॥ ३ ॥
रवाविवोदिते तत्र शत्रवोऽध्वान्तवद्गणाः ।
एवमादिप्रकारेण ज्ञेयमर्थान्तरेष्वपि ॥ ४ ॥

उपमानोपमेययोर्विपर्ययाद् यथा—

विजयी विद्विषोऽजैषीद्भास्वानिव तमोभरम् ।
अध्वंसयद्रविध्वान्तं विजयी विद्विषो यथा ॥ १ ॥
लुलितालकवल्लीभिर्भासते भामिनीमुखम् ।
ललल्लीलालिमालाभिर्नलिनी नलिनं यथा ॥ २ ॥
आभाति पद्मिनी पद्मं भ्रमरा षट्पदपङ्क्तिभिः ।
कान्तामुखमिवानीलविलोलालकवल्लिभिः ॥३॥

इत्यादि । ”

CHATTAMPI SWAMI ARCHIVE

स्पर्द्धते जयति द्वेष्ट्यनुकरोतीत्यादिकाः क्रियाः।
तथा लाक्षणिकाः शब्दाः व्यासेधाद्या इवार्थकाः॥ ४॥
व्यासेधोधरणीधरेशितु रनध्याय:सुधायाविधी,
रन्तर्द्धिर्द्धनदाचलस्य निधनं दुग्धोधसिन्धोः पिधा।
प्रत्याख्यान ममा नवद्विपमहादेहद्युतेर्निह्नवो,
जाह्नव्यास्तवमभुभुजङ्ग यशसां भारो दिशां हारति॥ १॥

यथाच—

इन्दुर्वंशस्य वीप्सा सदनमुपकथा पादयोः पङ्कजाली,
पर्य्यायोलिःकवय्यांस्तनुतनुमहसां वर्णिका कर्णिकारम्।
आभासः कुम्भिकुम्भद्वयमुरसिजयोः कामकोदण्डदण्डः,
पाषण्डो भ्रूलतायारतिरभिनयनं यत्सरूपस्य यस्याः॥ १॥
उपमा इव सन्देहे किं योगः किं मुखं किं शशी यथा॥ २॥

इति कविकल्पलतायाम् अर्थाख्यचतुर्थस्तवके सादृश्यं
नाम चतुर्थं कुसुमम्।

अथ रूपकादिकम्।

उपमेवेवादिविना द्विधा रूपकमिष्यते।
रत्नाकरे भवेद्भेद्यं रूपकं तोयमम्बुदे॥
भुव्याधारस्तथाधेयं सिंहे वर्णनभेदतः॥
ध्वान्ताहि विषनागाब्धिशैलवृक्षघनाम्नयः।
रक्षःशङ्कादयो भेद्या रूपकोक्त्या विरूपकैः॥
वनचक्राब्धिचक्राङ्ग चक्र-चातक-षट्पदाः।
पिककेकिमुखास्तोयं रूपकैर्मितरूपकैः॥
स्वगुणैर्भूनभोऽम्भोधिनदीवननगादयः।
रूपकस्थैः स्युराधारै राधाराख्यं हि रूपकम्॥

CHATTAMPI SWAMI ARCHIVE

रत्नसिंहसरोऽम्भोज चन्द्रादित्यद्रुमादयः ।
स्वधारैरूपकप्रोक्तैराधेयं केवलं क्वचित् ॥
कुलाम्भोनिधिमाणिक्यं वंशकाननकेशरी ।
भवारण्यामृतसरोनीतिगङ्गासरोरुहम् ॥
कुलाकाशेन्दुतीक्ष्णांशुसंसारमरुभूरुहः ।
जनमानसचक्राङ्ग शौर्य्यविन्ध्याद्रिकुञ्जरः ॥

अथ रूपकोपयोगिशब्दाः—

नागाङ्करत्ननिधिमेघमृगाङ्कसूर्य्या-
ऽऽकाशाग्निसिन्धुहरिदीपकसौधकुम्भाः ।
चक्राङ्कचातकमयूरचकोरचक्र-
पुंस्कोकिलावनसरोम्बुजरत्नभानि ॥
ज्योत्स्ना नदी शशि-कला सरसी पताका
वल्ली वनी कमलिनी दयिता सुधा श्रीः ।
कादम्बिनी-सुरभि-वृष्टि-सुरा-विमुक्ता-
तारा-करेणु-कलिका-लहरी-कदल्यः ॥

अथारोप्यगुणाः—

विवेकरजनीनाथसम्बर्द्धितशमाम्बुधिः ।
गुणहंसमनोहारिप्रतिज्ञावाहिनीरयः ॥
कीर्त्तिध्वजांचलभ्राजिमानमत्तमतङ्गजः ।
धैर्य्यविन्ध्याचलोत्सङ्गरङ्गत्सत्कीर्त्तिनर्मदः ॥
गुरुशौर्य्यांवरक्रीड़क्रीड़त्तेजोदिवाकरः ।
दानरत्नाकरक्रीड़प्रक्रीड़त्कीर्त्तिचन्द्रमाः ॥
प्रतिज्ञावाहिनीपूरपरिप्लुतरिपुद्रुमः ।
शौर्य्यदावानलप्लुष्टद्वेषिकीर्त्तिलतावनः ॥
वैरिकैरवकान्तारम्लानिकर्ड्रैयंभास्करः ।
गुणसागरविस्तारविवेकरजनीकरः ॥

CHATTAMPI SWAMI ARCHIVE

धैर्यहर्म्यच्चवर्य्यश्रीविलसद्गुणकाननः।
गुणमुक्तागणश्रेष्ठविवेकतटिनीपतिः॥

अथ भिन्नरूपकम्—

संग्रामपाथोनिधिसम्भवेन भवद्यशःकैरविणीधवेन।
लीलापरिस्मेरितदिङ्मुखेन म्लानिस्म विद्वेषिमुखाम्बुजानि॥

यथाच—

यम-महिष-विषाणं भ्रूलता-काल-रात्रेः
कुपित-नियति-भालारात-लेखा-ललाम।
अधिसमिति विपक्षैर्लक्ष्यते वीरलक्ष्मी-
स्तन-तट-नख-लक्ष्म त्वद्धनुः क्षौणिपाल॥

यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ यथा—

किं ब्रूम हे धरणिमण्डलमण्डनानाम्
देव! त्वदीय-यशसां महतामनीतिम्।
यद्विद्विषन्ति जगदीश शरीरशोभाम्
यच्चास्य हासमुपहासपथं नयन्ति॥

अतद्रूपस्यान्यथाध्यवसानमतिशयार्थमुत्प्रेक्षा यथा—

त्वत्कीर्त्तिकान्तिधनमपहृत्य राजन्
दिव्यं सृजन्निव जगत्यपवादभीतः।
इन्दुः सुधावपुरपि प्रभुरोषधीना-
मप्येष लक्ष्ममिषसर्पंहृतौ न शुद्धः॥

यथाच—

समिति त्वत्करवालः पीत्वा मातङ्गकुम्भकीलालम्।
अनुतापीव व्रतयति रिपुनृपतीनां यशःक्षीरम्॥

यथा—

द्विषन्मृगाक्षी नयनाञ्जनानि यदेष नित्यं कवलीकरोति।
क्षितीश तेनाञ्जनसन्निभैव विभाविभातिस्म भवत्कृपाणे॥

CHATTAMPI SWAMI ARCHIVE

अन्योन्यभ्रान्तिकोऽभेदो यदाऽन्योन्यं द्वयोर्भ्रमः ।
तत्रोपमेयानुक्तौ तु समासोक्तिर्मता यथा ॥

कीराः पचेलिमफल-भ्रमतः पतन्ति
जम्बू-तरु-प्रसव-लग्न-मधुव्रतेषु ।
एते च चञ्चुपुटकेषु विशन्ति तेषां
सान्द्राः पलाश-कुसुमावलिमाकलय्य ॥

कार्य्यप्रवृत्तौ भ्रमतः साफल्यं जायते क्वचित् ।

यथा—तव विधुमणिसौधप्राङ्गणे चन्द्रबिम्ब-
प्रतिकृतिमनुफुल्लत्कैरवभ्रान्तिभाजः ।
असकृदमृतबिन्दुष्यन्दपानेन भृङ्गाः
प्रथमरमकरन्दस्वादुसौख्यं लभन्ते ॥

इति कविकल्पलतायाम् अर्थाख्ये चतुर्थे स्तवके
रूपकादिकं नाम पञ्चमं कुसुमम् ।

अथ समस्यापूरणोपायः ।

अथ संक्षेपतो वक्षे समस्यापूरणे विधिम् ।
तत्रादौ विशदाः पञ्च प्रोच्यन्ते कारिका यथा ॥

कल्पादि सिन्धुलघुभिर्गुरुता युगान्त-
दूरावलोकगुरुभिर्लघुता विधेया ।
विष्णोरधोमुखतया प्रतिबिम्बतश्च
स्याद्वैपरित्यमुदकादिषु युग्मता च ॥

अयमर्थः—कल्पस्यादिः कल्पादिः, लघुः क्षुद्रपदार्थः ; एतैर्हेतुभूतैर्वस्तुनो गुरुता विधेया । सृष्टौ हि स्रष्टा महावयवानेव निर्मिमीते स्म पदार्थान्, कालक्रमेण च सर्वे दुर्लभा अभूवन्, सामुद्रियद्रव्येषु शाश्वतिक एवातिरेकः, लघूपेक्षया

CHATTAMPI SWAMI ARCHIVE

ततोऽधिकस्यापि महिमा योज्यः, युगादिभिर्हेतुभिर्लघुता कल्पनीया च, युगान्तसमये हि सर्वं लघु भवति, दूरे दृश्यमाना: पदार्था: अतिक्षोदीयांस इव भासन्ते ; गुर्वपेक्षयाप्येवमाकलनीयम्।

उदाहरणानि यथा—

कल्पादिकाले गुरुदेहदेश्या पिपीलिका राजति शैलतुल्या।
तदा लघीयानपि गण्डशैल: श्रीखण्डशैलस्य तुलां तनोति॥

सिन्धुना यथा—

अहो पयोराशिनिवासि याद: पिपीलिका राजति शैलतुल्या।
सदा जनानां महतां हि सङ्गो धत्ते लघूनामपि गौरवाणि॥

माहात्म्यं तस्य पाथोधेर्व्याख्यातुं शक्यते कथम्।
सापि यत्र विभात्यब्ध: कीटिका कुम्भिसन्निभा॥

स्थले स्थिता यावन्तस्तावन्तो जीवा जलेऽपि निवसन्तीति बोद्धव्यम् ; ते सर्वे निर्वासितखर्वभावा: स्वभावादेव।

लघुभिर्यथा—

कृमिप्रमाणेन महत्तमाङ्गी पिपीलिका राजति शैलतुल्या।
यस्मादधोध: परिदर्शनेन सदा लघूनामपि गौरवाणि॥

लिक्षा लक्षाग्रत: कीटकोटि: करिघटायते।
बिन्ध्याद्रिमुद्रामाधत्ते मत्तेभ: कलभाग्रत:॥

अथ गुरुपदार्थस्य युगान्तेन दूरावलोकनेन गुरुभिश्च लघुता विधेया। यथा—

कल्पान्तकालकवलीकृत सर्वगात्रो
गोत्रो बिभर्त्ति सुतरां परमाणुरूपम्।
संवर्त्तपूर्वसमये बिभरांबभूव
यो जातरूपधरणीधर सन्निभत्वम्॥

CHATTAMPI SWAMI ARCHIVE

विश्वम्भरास्थितपदार्थसमीक्षणोत्कः
स्वर्लोकमार्गचरखेचरकामिनीनाम्।
अभ्यागतो नयनवर्त्म महाचलोऽयम्
सत्यं बिभर्त्ति परमाणुसमानरूपम्॥

कल्पान्तकालधरणीधरणप्रवृत्तो
कोलाधिराजतनुमानविलोकनेन।
शैलो बिभर्त्ति परमाणुसमत्वमेव
सर्वस्य लाघवमहो गुरुसन्निधौ स्यात्॥

परमाणुतनोरग्रे कीटिका वारणायते।
वारणोऽपि सुवर्णाद्रिमानतः कीटिकायते॥
महाद्रिशिखरस्थानं वारणः कीटिकायते।
साधुचित्तानुमानेन महाद्रिः कीटिकायते॥

इत्यादिगुरुतरपदार्थेन गुरुतरपदार्थस्य लघुता विधेया।

विष्णोरधोमुखतया वैपरीत्यं यथा—

कालीयाहिग्रहव्यग्रे यमुनायां जगन्निधौ।
गङ्गयाधोमुखं जातं विपरीतं जगत्त्रयम्॥

अपरेणापि प्रकारेण विपरीतीकृते कृष्णे तदुदरवर्त्ति-जगत्त्रयमध्यस्थितः सर्वोऽपि पदार्थो विपरीतो भणनीयः।

प्रतिबिम्बतो वैपरीत्यं यथा—

तडागे दर्पणप्राये प्रतिबिम्बादजायत।
जलमध्यात्कृतः कृष्णप्रसादः कलशोपरि॥
तन्मुखस्याब्धिसंक्रान्ता धूमवर्त्तिरधोमुखी।
भाति यान्तीव पातालं पवित्रयितुमुज्ज्वला॥

उदकादौ युग्मत्वं यथा—

रात्रौ चन्द्रोदये तोयप्रतिबिम्बितविग्रहः।
लोकैरेकोऽपि कोकोऽयं सद्वितीयः समीक्ष्यते॥

पूर्वाद्रौ रत्नभित्यन्तर्जातार्कप्रतिबिम्बतः।
शङ्क्यते शत्रुकान्ताभिः किमुदेति रविद्वयम्॥

चन्द्रान्धकाररविकीर्त्तिकुकीर्त्तिसन्ध्या-
रागात् पिधङ्गकृतवर्णविपर्य्ययेण।
दृष्टान्तवद्वयदिशब्दतया पुराणै-
र्वात्सल्यशोकमधुघातवियोगसादैः॥

स्वप्नेन्द्रजालिकमतिभ्रमचित्रमाया-
मन्त्रौषधीमणितपः पदभङ्गभावात्।
शौर्य्योत्थवाञ्छितमनोगतिपुण्यदेव
प्रश्नोत्तरच्चयसमासविभिन्नसाध्यात्॥

श्रीहाटकेश्वरजगत्प्रलयप्रहास्त-
पाथोधिमन्थसमय प्रतिविम्बभावैः।
संग्रामचक्रपुरचन्दनशस्त्रपातै-
श्चण्डीशपद्मगुरुताभिरथोपमानैः॥

तद्दुर्घटं भवति तत् प्रकटं पटीया-
नौचित्यचिन्तितपदं परिपूरयेद्‌ यः।
पूर्वोक्तपद्मगदितैरुपदेशभारै-
रेतैरितिस्म कविकल्पलताकृदाह॥

अथोदाहरणानि—

कृष्णरक्तादयो वर्णाश्चन्द्रेण श्वेताः क्रियन्ते। यथा—

उल्लसत्तुहिनज्योतिर्द्युतिविद्योतितोऽभितः।
कैलासशैलसङ्काशः काशते विन्ध्यभूधरः॥

जवापुष्पं जातिसमं सुवर्णं रजतप्रभम्।
सुधाकरकरस्पर्शाद्‌ भाति चन्दनवन्मषी॥

अन्धकारेण यथा—

कैलासो विन्ध्यसंकासः कर्पूरः कज्जलप्रभः।

जपातापिञ्छगुच्छश्रीस्तमसा भाति लिम्पिता ॥

कृष्णश्वेतादयो वर्णा बालार्केण प्रथमं रक्तास्तदनु पीताः क्रियन्ते। यथा—

कज्जलं कुङ्कुमच्छायं जातीपुष्पं जपासमम्।
सुवर्णं पद्मरागश्रि प्रभातार्कप्रभावृतम् ॥

इत्थमन्यत्रापि वर्णविपर्ययः कार्यः। यदा पुनश्चन्द्रादीनामेव वर्णविपर्ययश्चिकीर्षितस्तदाकीर्त्यादिभिरेतेषामेव वर्णविपर्ययः।

स्वर्धुनीसलिलसन्निधिस्फुरत्तावकीनघनकीर्त्तिमण्डलैः।
विस्तृतैस्त्रिजगति क्षमापते! शीतरश्मिरिव वीक्ष्यते रविः ॥

अन्यवस्तूनां यथा—

मेदिनीदयित तावकैर्यशः स्वल्पसञ्चयैरुपचितैः समन्ततः।
क्षीरनीरनिधिसोमकोमलैर्जायते रजतकान्तिकज्जलम् ॥

हिमाद्रिसदृशो मेरुर्भाति कुङ्कुमविन्दुवत्।
भूमिपाल! भवत्कीर्त्या शुभ्रिते भुवनत्रये ॥

कुकीर्त्या यथा—

भूमिपाल! भवदीय-विद्विषन्मेदिनीपतिकुकीर्त्तिपंक्तिभिः।
प्रावृषेण्यजलवाहकान्तिभिः श्यामलो जयति यामिनीपतिः ॥

अन्यवस्तूनामपि यथा—

मेदिनीदयित! तावकद्विषत्प्रोज्झितद्गुरुतरायशःशतैः।
अन्धकारनिकरैरिवोद्धतैः कुङ्कुमं मृगमदायतेतराम् ॥

हिमाद्रिर्विन्ध्यबन्धुश्रीः स्वर्णं मरकतप्रभम्।
धराधर! भवद्द्वेषि कुकीर्त्ति प्रसरैर्विभो ॥

सन्ध्ययोर्यथा—

पूर्वभूधरशिरस्तटीचरः सान्ध्यरागपटलैः परीवृतः।

CHATTAMPI SWAMI ARCHIVE

दृश्यतामिह विभावरीमुखे विद्रुमः प्रतिनिधिः सुधानिधिः ॥

विद्रुमारुणविम्बोष्ठप्रभापाटलितद्युतिः ।
वदने तव तन्वङ्गि ! कर्पूरः कुङ्कुमायते ॥

कान्तकोपपरवामलोचना लोचनान्तविततारुणद्युतौ ।
सान्ध्यरागपटले सति क्षणं कज्जलं जयति कुङ्कुमोपमम् ॥

स्वर्णं सिन्दूरपूरश्च कर्पूरं पद्मरागरुक् ।
जपाकुसुमसंकाशैः सन्ध्यारागभरैरभूत् ॥

वर्णान्तरसङ्गाद् यथा—

शशिमुकुटललाटे शैलजागण्डपाली-
विगलितमृगनाभिव्यक्तघर्माम्बुसिक्तः ।
समजनि नरकारिश्यामलो यामिनीशो
जगति मलिनसङ्गात् को न मालिन्यमेति ॥

मसृणघुसृणपङ्कप्रक्रियाभङ्गिजाग्रत्
कुचकलशविकासैः कुन्दचन्द्रोज्ज्वलोऽपि ।
अगमदुदरभावं कामिनीकण्ठहारो
जगति भवति रागो रागिसङ्गान्न कस्य ॥

क्षितिधरपतिपुत्रीमौक्तिकव्यक्तिभङ्गी-
निलयवलयमालाकान्तिजालावलीढः ।
हिमरुचिरुचिरासीन्नीलकण्ठस्य कण्ठो
भवति विमलयोगान्निर्मलत्वं न कस्य ॥

अत्युच्चैः स्फुर्जदभ्रंलिहग्टहवलभीवर्य्यवैदुर्य्यनिर्यत्-
ज्योतिर्यातप्रपातव्यतिकरविधुरीभूतशोभाभिभूतः ।
कालिन्दीकालकान्तिः समजनि रजनीजीवितस्याधिनाथो
धत्ते को वा कलावानपि हिममलिनासङ्गतः कश्मलत्वम् ॥

अहो राहुग्रहग्रस्तसमस्तोज्ज्वलमण्डलः ।
इन्दुः कज्जलविन्दुश्रीर्म्लानिः कस्य न विप्लवे ॥

CHATTAMPI SWAMI ARCHIVE

दृष्टान्तवद्व्यदिशब्दतया यथा—

प्रतीच्यां यदि मार्त्तण्डः समुदेति स्फुरत्करः।
तदा संजायते नूनमग्निस्तुहिनशीतलः॥

पुराणैः पुराणचरितैर्यथा—

अगस्त्यमुनिनिःपीत निःशेष जलमण्डलात्।
अह्नः पतिमह्नः शुष्कात्समुद्राद्धूलिरुच्छ्रिता॥
अतुच्छ-वत्स वात्सल्य पिच्छिलीकृतचेतसा।
जनन्या मन्यतेऽत्यर्थं व्याघ्रः सौम्यवपुः क्षमी॥

शोकेन मधुनाघातेन वियोगेन मादेन च समस्या पूर्य्यते, यत एभिर्व्याप्तः पुमान् विपरीतमाचरति। स्वप्नेऽघटमानमपि घटते। भो! ज्योतिषकलाकुशल! स्वप्ने दृष्टमिदं त्वं विचारयेदित्यादि कल्पनीयम्। इन्द्रजालेन मतिभ्रमेण चित्रेण च। भो! चित्रकार! ईदृक् चित्रं लिखेति वाक्यं रचनीयम्। माययाऽपि विसदृशं सम्भाव्यम्। मणिमन्त्रौषधीनां प्रभावेन सर्वं साध्यते। यस्मादचिन्त्यो मणिमन्त्रौषधीनां प्रभावः। तपसापि सर्वं साध्यते। यतः सर्वं हि तपसा साध्यं तपश्च दुरतिक्रमम्।

पदभङ्गेन यथा—

मृगात् सिंहः पलायते। मृगमत्तीति मृगात् सिंहविशेषणम्, पलाय मांसाय, ते तव इत्यर्थः।

अयं मृगः समायाति मृगात् सिंहः पलायते।
इतो वेगात् पलायस्व त्वरितैस्त्वरितैः पदैः॥

शौर्य्येणोष्मणा वाञ्छितेन मनोगत्या पुण्येन दुर्घटमपि घटते। देवप्रसादेनासाध्यमपि साध्यते। यथा—

निःश्रीकोऽपि विभो! विभातसमये पश्यत्यवश्यं पुमान्,
यस्ते पद्मसमानमाननमसौ स्यादिन्दिरामन्दिरम्।

CHATTAMPI SWAMI ARCHIVE

देहोल्लासि किमु स्तुमस्त्वदपरं यस्य प्रसादाद्भुतैः
मूको जल्पति संशृणोति बधिरः पङ्गुर्नरीनृत्यति॥

प्रश्नोत्तरेण यथा—

कस्तूरी जायते कस्मात्? को हन्ति करिणां कुलम्?
किं कुर्यात् कातरो युद्धे? मृगात् सिंहः पलायते॥

समस्यायां यत् साध्यं पदं तत् क्वचित् समासेन भिन्नं क्रियते। यथा—

कर्पूरपूरच्छविवादविद्यासंवादवृकद्युतिशुभ्रिताभ्रे।
इन्दोर्नृपद्वेषितमोवितानसूर्योदये रोदिति चक्रवाकी॥

हाटकेश्वरनमस्कारेण पाताले स्वर्गलोकावतारः। जगत्प्रलयेन मर्त्यलोकावतारः। ग्रहास्तेन नभोलोकावतारश्च। यथा—हाटकेश्वरयात्रायां शिवरात्रिमहोत्सवे।

सुरेन्द्रादिभिरायातैः स्वर्गः पातालमाययौ॥

जगत्प्रलयकालेऽसौ पृथ्वी पातालमाययौ।
संहारघोरचण्डीशकोपाटोपादुदित्वरात्॥

कदाचिच्चारभेदेन क्रमादस्तमुपागतैः।
ग्रहैः सम्भाव्यते सम्यग् ययौ व्योम रसातलम्॥

पाथोधिमन्थनारम्भे सम्भेदाद्देवनागयोः।
पृथिव्यां स्वर्गपाताले दृश्येते स्म समागते॥

दर्पणप्रतिमोल्लासि पयःपूरे सरोवरे।
प्रतिबिम्बच्छलादेतद् भुवि व्योम समागतम्॥

सङ्ग्रामधीरवीराणां विलोकनकुतूहलात्।
समायातैः सुरेन्द्राद्यैः स्वर्गो नभसि दृश्यते॥

आकाशान्तरसञ्चारिहरिश्चन्द्रपुरच्छलात्।
भूतस्य मिलनायैव जगाम धरणीं नभः॥

CHATTAMPI SWAMI ARCHIVE

श्रीरामरावणरणे कपिमण्डलेन,
शस्त्रीकृतैर्मलयजद्रुमचक्रवालैः।
रिङ्गद्भुजङ्गमुकुलैः परितः स्फुरद्भिः,
सम्भाव्यते नभसि सर्पपुरं प्रसर्पत्॥

श्रीकण्ठकण्ठदोर्दण्ड जटाजूटाहिमण्डलैः।
अहो पाताललोकोऽयं स्वर्लोककलिताश्रयः॥
अभ्रंलिहगृहव्यूह चन्द्रशालाविलासिभिः।
नरनारीगणैरेवं मर्त्त्यलोको द्युलोकगः॥
सुमेरुशिखरप्रान्त स्फुरद्दिव्यवधूमुखैः।
परितः स्फुरितः शङ्के शतचन्द्रं नभस्तलम्॥
युद्धक्रुद्धभटाच्छिन्नकुम्भिकुम्भस्थलोद्गतैः।
मुक्ताफलगणैः शङ्के दिवा तारकितं नभः॥
यदेतन्मयकाऽकारि कारिकारत्नपञ्चकम्।
कुरुतानवगीतेन तेन श्रवणपूरणम्॥
अथ चित्तसमस्यायाः पूरणोपाय उच्यते।
पदैः साधारणैरेव च्छन्दः संपूरयेद् यथा॥
अशेषजनताचित्तचमत्कारनिकेतनम्।
हरिसिन्धुस्फुरद्रोचिः केषां न कुरुते सुखम्॥
स्फुरत्सौदामिनीकान्तबहुलश्लाघनीयभाः।
कलधौतरुगत्यन्तं कुरुते सुखसम्पदम्॥
जनताविस्मयाधानं वसुधासुखकारणम्।
महतां चक्रवालेन व्यतिभाते समन्ततः॥
विशदच्छाययातीव विलसत् प्राणिसौख्यकृत्।
आश्चर्यशाला तनुरुक् तनुतेऽपचितिं सताम्॥
सदा विलाससदनं निदानं परमश्रियम्।
महासुखलतावीजं नेत्रयोः कुरुते रतिम्॥

CHATTAMPI SWAMI ARCHIVE

विभाति विभुतास्थानं घनोपलसितोरुभा:।
मनोरमप्रभावास: कलया लोकसौख्यकृत्॥
हरिमातङ्ग-सच्छाय-रोचि: परमभूषणम्।
कस्यामोदैकहेतुर्नगोमण्डलविभूषणम्॥
उद्दामविस्फुरत्कान्ति रुचिरं गवि भासते।
सदामोदपदं चित्रनिदानं हरिचारुभ॥
मनोहराकारतयातिरम्यता समुल्लसच्चारुकलानिकेतनम्।
अशेषभूमीतलवर्त्ति सौख्यकृद् विलोचनानां कुरुते सुखावलिम्॥

सामान्यशब्दकुसुमे ये सामान्यशब्दा: कथिता: तेऽचापि सञ्चारणीया:।

यत्किञ्चिदत्र न मया गदितं ग्रन्थस्य गौरवत्रासात्।
मत्कृतकविकल्पलतापरिमलतस्तद्बुधैर्ज्ञेयम्॥

इति कविकल्पलतायामर्थाख्ये चतुर्थे स्तवके
समस्यापूरणोपायो नाम षष्ठं कुसुमम्।

अथ समस्या:।

अथ चितिस्थातंकियत्समस्या पदाङ्कुरं पल्लवितं करोमि।
यच्छायमाश्रित्य कविर्न विन्द्यात् परिश्रमं वाङ्मयमार्गजातम्॥
त्रियामा शतयामा स्याच्छतचन्द्रं नभस्तलम्।
शतेषुरेषु पञ्चेषुर्भवेद् यूनां वियोगिनाम्॥
त्वद्गाम्भीर्य्यगुणस्याग्रे समुद्रो गोष्पदायते।
त्वन्मानससरोजान्तर्गगनं भ्रमरायते॥
अमत्तीभवतस्तत्र पीयूषपरिवेषणे।
अभून्नारदवीणाया अलावीरन्तरे सुधा॥
अध:कृतं क्षणादेव तेजोऽनर्थाय जायते।

CHATTAMPI SWAMI ARCHIVE

इहत्येव हि धातारं दीपवर्त्तिरधोमुखी ॥
भालनेत्रानलोद्दान्तकज्जलौघमलीमसः।
महेश्वर-शिरस्थायी सोमः श्यामतमोऽभवत् ॥
निशीथे सैंहिकेयेन ग्रस्तसम्पूर्णमण्डलः।
गगनेन्दीवरोत्सङ्गे इन्दुरिन्दीवरायते ॥
हीनत्वात् दधात्येव लाघवं महतामपि।
इति मत्वा द्विपद्वेषी मृगात् सिंहः पलायते ॥
पूर्वो ह्रस्वः परो दीर्घः स्नेहः संजायते सताम्।
असतां विपरीतस्तु स एव परिदृश्यते ॥
इहार्थसूत्रं यस्यादौ तेन शास्त्रेण निर्भरम्।
जिज्ञासा ब्रह्मणो यस्य क्रियते तदुपास्महे ॥
धन्योऽसौ पोत्रिणीपुत्रो यस्यासौ प्रलयापदि।
सगोत्रोऽपि स्थितो दंष्ट्रा कण्टकाग्रे महोदधिः ॥
भुवं बिभर्त्ति यस्यैकं शिरोहीनः सुलोचनः।
स त्वां प्रणमितुं स्तोतुं द्रष्टुं श्रोतुं क्षमः प्रभो ! ॥
अयशः स्वं सुतनुते तन्वाते तन्वते जिताः।
कज्जलालिकलङ्कानां व्याजाद्दीपाम्बुजेन्दवः ॥
रत्नाभरणविद्योतपरया वातनश्वरः।
अन्धकारभयाद्दीपस्तन्वङ्ग्या नीयते शमम् ॥
भ्रामय्यङ्घ्रिहतिभ्रान्ते जगतीत्यरयो ब्रुवन्।
मक्षिकापादघातेन कम्पितं भुवनत्रयम् ॥
उषाप्रीत्यै पटे सूक्ष्मे चित्रितं चित्रलेखया।
मक्षिकापादघातेन कम्पितं भुवनत्रयम् ॥
सभाभित्तिमणिश्रेणि प्रतिबिम्बितविग्रहे।
धार्त्तराष्ट्रशतेऽतर्कि कन्दर्पाणां शतद्वयम् ॥
अहल्याकेलिकालेऽभूत् कन्दर्पाणां शतद्वयम्।

CHATTAMPI SWAMI ARCHIVE

तत्पञ्चवाणीभिन्नाचः सहस्राचोऽम्बुतां गतः ॥
वलिसङ्कोचशालाग्र प्रतिष्ठितगभीरिमा ।
उपपन्नतमा जाता प्राकारोपरि कूपिका ॥
लङ्कादाहे सुरैरुक्तं हनुमत्पुच्छवञ्चितः ।
सौवर्णो द्रवतां गच्छंस्तम्भ एष घृतायते ॥
उन्मीलत्तिलकं क्वापि क्वचित् प्रस्फुरिताञ्जनम् ।
क्वचित् पत्रावलीकीर्णं स्त्रीमुखं पर्वतोपमम् ॥
गोलब्धजन्मा मधुरः शिखि-प्रीति-विवर्द्धनः ।
उन्मीलदर्जुनच्छायो नवनीतायते गिरिः ॥
सद्म पद्मवदाभाति लसद्वारविराजितम् ।
पत्रकेशरसंपूर्णं यदानन्दायते मनः ॥
घनबालमनोहारि सुमनोभिर्निषेवितम् ।
बहुधातुलसत्कान्ति पुस्तकं मस्तकायते ॥
एषा न जातबालेन्दुर्घनोत्तुङ्गपयोधरा ।
अभिरामवयोधामसम्ध्या वन्ध्यावधूरिव ॥
स्निग्धालिबद्धसौहार्द्दा सरसामोदमन्दिरम् ।
इयं गुणवती भाति पुष्पमालेव कामिनी ॥
कलानिधिकरस्पर्शप्रसन्नोल्लासितारका ।
बिभ्राणाम्बरमानीलं यामिनी कामिनीयते ॥
उल्लसत्यार्थिवद्रव्योपासिता जीवनार्थिभिः ।
उपकण्ठाभिरामेयं गर्गरी नगरीयते ॥
कृतरामानिशप्रीतिरच्चविक्षेपकारणम् ।
समुद्रतरणोल्लासी दीपोऽयं हनुमानिव ॥
वितन्वानो द्युतिं स्निग्धश्यामाञ्जनमनोहरः ।
दीपो नीपोपमो भाति घनालोकविकस्वरः ॥
विस्फुरन्मीनमकरा हंससञ्चारमञ्जुला ।

CHATTAMPI SWAMI ARCHIVE

राजते सरसीवद्द्यौ रटत्कर्कटसङ्कटा ॥

आपः कादम्बिनीस्तन्वन् नलिनीलतयाश्रितः ।
उल्लासितजगत्प्राणस्तड़ागो गगनायते ॥

आपीततारकः पादैराक्रान्तगिरिकाननः ।
बिभ्रदुग्रललामत्वं विड़ाल इव चन्द्रमाः ॥

रुचा त्रिनेत्रदायादः प्रमदालयतां दधत् ।
हरिणाङ्कः सुधाधारः सौधोऽयं चन्द्रमायते ॥

चूतश्चन्द्र इवाभाति कुहूभिर्जनितच्छयः ।
धत्ते चकोरकामोदकरः खगमनोरुचिम् ॥

सोमः प्रीतिकरः कुर्वन् वनं सुबहुविद्रुमम् ।
समुद्रोऽग्निरिवाभाति दीप्तश्रीसूः सदानवः ॥

स्फुरद्विमकराक्रान्तः प्रकाशयन् क्रमेण धृतिजनकः ।
अन्तर्वर्त्तिशिखावान् समुद्र इव भवति दीपोऽयम् ॥

अमुद्राभारतस्तत्र पीयूषपरिवेशिना ।
अभून्नावदवीणाया अलावोरन्तरे ध्वनिः ॥

गोवत्सजन्यो मधुरः शिखिप्रीतिविवर्द्धनः ।
उन्मीलदर्ज्जुनच्छायो नवनीतायते गिरिः ॥

इहापि सूत्रं यस्यादौ तेन शास्त्रेण निर्भरम् ।
जिज्ञासा ब्रह्मणो यस्य क्रियते तदुपास्महे ॥

पूर्व्वो ह्रस्वः परो दीर्घः स्नेहः संजायते सताम् ।
असतां विपरीतस्तु स एव भुवि दृश्यते ॥

भुवं बिभर्त्ति यस्यैकशिरोहीनः सुलोचनः ।
स त्वां प्रणमितुं स्तोतुं द्रष्टुं श्रोतुं च्चमः प्रभो ! ॥

कलानिधिकरस्पर्शप्रसन्नोल्लासितारका ।
विभ्राणाम्बरमानीलं यामिनी कामिनीयते ॥

वयसः शेषे सेवा पररूपं करोति तव देव ! ।

अधुना सुरतटिनीतटनिकटे वासी विनाशो वा ॥

चमूं भरन् पञ्चदुदञ्चदुर्व्वीतले प्रयाणे तव भूमिपाल ! ।
अभून्नृपाणां विगलत्त्रपाणां कण्ठे कुठारः कमठे ठकारः ॥
पितामहादेशवशाद्रसायास्तलं यदा ते प्रविवेश वाणः ।
तदा वभूवार्ज्जुनवीरवैरिकण्ठे कुठारः कमठे ठकारः ॥
आद्यं निशायाः क्षणमन्त्यमन्तर्बुध्वा विधुं तापिनमुष्णभानुम् ।
विम्बं स्वकं भ्रान्ततया च कान्तं चन्द्रोदये नृत्यति चक्रवाकी ॥
सर्वस्य जन्तोर्भवति प्रमोदो विरोधिवर्गे परिभूयमाणे ।
तिरोहिते त्वद्यशसा नरेन्द्र ! चन्द्रोदये नृत्यति चक्रवाकी ॥
निशाकरोत्सङ्गनिषण्णतुङ्ग-कुरङ्गशृङ्गे जलधेर्निवासः ।
आसीत् पुरासीमपयःपयोधिर्निर्मन्थनादित्यवदन्मुनीन्द्रः ॥
सरोनिभे व्योम्नि सिताम्शुकाभं शशाङ्कमङ्कः कलयत्यमुं यत् ।
अवैम्यतः स्वच्छकलाच्छतारमाखुः खनत्यम्बरमम्बुमध्ये ॥
पूर्वाचलग्रावणि शृङ्गसङ्गि स्फुरन्महानीलविभाविलासैः ।
प्रलिप्तमूर्त्तिः प्रतिभाति किन्नु श्यामामुखे कज्जलविन्दुरिन्दुः ॥
मयूरमालोक्य महात्तसब्भ्रिमण्डूकमन्नस्य मुखे महाहिः ।
विवेश वल्मीकविलभ्रिम शङ्कां वधं हि वामो विदधाति वेधाः ॥
राधामुखं चुम्बति कार्त्तिकेयः कर्णावतंसीकृतफुल्लपद्मम् ।
शृणोति तस्मादुदितञ्च गीतं कृष्णः स मुग्धे ! प्रणयी कथं ते ॥
कृष्णेन दृष्टा किल कौतुकेन स्थाना हिमैर्गोपिकया कयापि ।
हसन्तिकायां निहितास्य शक्त्या ननर्त्त वह्नौ नवनीतनारी ॥
समस्तनीहारधवादधाना घनाः प्रसूनेषुशिलीमुखालिः ।
उपास्यतां नील-तमाल-कान्ता चामोदरी वा क्षितिभक्षणस्य ॥
मशोः शृङ्गं सप्ततालप्रमाणं कल्याणाद्रिः सर्षपस्यैकदेशः ।
विन्दुः सिन्धुः सिन्धुरप्येकविन्दुः अब्धौ मुग्धे ! साधुनीचोपकारे ॥
जहास बन्ध्या स्वसुतास्यदर्शनात् चचाल पङ्गुः स्वपदेन लीलया ।

CHATTAMPI SWAMI ARCHIVE

नितान्तमूकश्च वदावदोऽजनि प्रसादतस्ते तरुणेन्दुशेखर ! ॥
जहि तमो गरुड़ध्वज ! धूर्जटे ! कुरु करे गरलं पिब चामृतम् ।
सुविदितैव जगद्दुरितारिता निगदिताऽवत विश्वमजद्वयी ॥

संध्यावियोगपरितापिनि गाहमाने
भानौ सरोविकसिताम्बुरुहं रजन्याम् ।
तद्वीक्षयेव मकरन्दगतात्मबिम्बः
चन्द्रोऽरविन्दकुहरे विहरत्यरोषः ॥

भ्रूचक्रमक्रविलसच्छविबन्धतास्ति
तद्दच्च पञ्चशरशासनशालिता ते ।
सल्लाञ्छनत्वमपि गाङ्गजलोषितत्वम्
हारे हरे हिमकरे मकरे करे च ॥

प्रत्यक् पयोनिधितटीचरमोचितं यद्
बन्धूकपुष्पसदृशं तमसोऽतिरेकात् ।
जानामि कुण्डलिततक्षकशङ्कया तन्-
मार्त्तण्डमण्डलमखण्डिशिखण्डितुण्डैः ॥

पीताम्बरोऽद्य जलदस्तडिदद्य लोला
भीमोऽद्य वारिनिवहः सरिदद्य दुर्गा ।
दोषाकरोऽद्य समयः क्षितिरद्य चार्द्रा
लोभा भविष्णु शिवमाविधुनोति तन्वि ! ॥

हयनिकरखुरोत्थैः कर्णवातावधूतै-
र्नवजलदनिभस्ते हस्तिसङ्घो रजोभिः ।
धवलयति धरित्रीमन्धकारप्रचारः
स्फुटमिति निगदन्ति क्ष्माप ! साश्चर्यमार्याः ॥

अजनि रजनिमध्ये मण्डलं चण्डरश्मे-
र्धनुरुदयमनभ्रा बिभ्रती द्यौस्तकास्ति ।
कुरु हि विधिरिदानीं दृश्यते देव ! वामः

प्रहिणु जनकपुत्रीं मित्रतामेतु रामः ॥
प्रविशतु हरिनाभीपङ्कजान्तर्निषण्ण-
द्रुहिणचरणसेवां कर्त्तुमिन्द्रे ससैन्ये।
अगणितपरिमाणे भृङ्गभृङ्गी दधानो
भ्रमति कमलकोषे मत्तमातङ्गसङ्घः ॥
जलमुचि जलपूरं मुञ्चति स्पष्टशब्दम्
प्रतिगज इव कोपादूर्द्ध्वविन्यस्तहस्ताः।
सपदि समुपयातोदन्वता व्याप्तवक्त्राः
सरलितकरदण्डाः कुम्भिनोऽम्भः पिबन्ति ॥
प्रसृमरमधुपालीपातसम्पातपुष्यत्-
कमलबहलगन्धं विन्ध्यमध्यास्य वाप्याम्।
जलगतनिजमूर्त्तिं वीक्ष्यमानाः सशङ्कम्
सरलितकरदण्डाः कुम्भिनोऽम्भः पिबन्ति ॥
तिलकमलिकसंस्थं वीक्ष्यते पक्ष्मलाक्ष्या
मृगमदगजराजीराजितं यावदाशु।
अमलजललवान्तस्तावदेवास्य पानान्-
मशकगलकरन्ध्रे हस्तियूथं प्रविष्टम् ॥
कृशतरजठरान्तर्देवकस्यात्मजायाः
सकलभुवनलीलावास ! यस्ते निवासः।
मनुज दनुजदेवाश्चर्यभूतं तदेतन्-
मशकगलकरन्ध्रे हस्तियूथं प्रविष्टम् ॥
भ्रमति कमलकोषे मत्तमातङ्गसङ्घः
सरलितकरदण्डाः कुम्भिनोऽम्भः पिबन्ति।
मशकगलकरन्ध्रे हस्तियूथं प्रविष्टम्
समुदितमिति मत्वा यः प्रगे सम्प्रयातः ॥
उदारालङ्कारा सुललितपदाऽऽविष्कृतरसा

CHATTAMPI SWAMI ARCHIVE

समापन्ना शय्या मदनुगुणमाणिक्यसुभगा।
स्फुरद्वर्णाभ्यर्णस्थितजनघनानन्दवसतिः
समस्या वेश्येव प्रतिपुरुषमेषा विलसति॥

गते देशाद्देशं प्रणयिनि कृशाङ्ग्याः स्फुरदुरु-
व्यथायाः संतापप्रशमनविधौ नीरजयुगम्।
सखीभिर्निक्षिप्तं मुकुलितमुखं तत्र शुशुभे
कुचद्वन्द्वस्योपर्यपरमिव जातं कुचयुगम्॥

प्रसर्पत्तापार्त्तिप्रशमनविधानाय मलय-
द्रुमक्षोदाभ्यङ्गाधिकतरभवत्पाण्डुरतनोः।
अभिज्ञोऽप्यज्ञासीत् कथमपि सखीनां परिकरो
न सेटोऽमल्लस्याचमिकमिवमां प्रत्ययलुकाम्॥

अलिव्राताघ्रातप्रसवमयचापे विजयिनि
प्रविष्टे पातालं जलनिधिपदव्या रतिपतौ।
अधो मैनाकस्य स्थितवति समस्तं समभवद्
धनुष्कोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः॥

प्रयात्यब्धिद्वारा फणिपतिभुवं हन्तुमसुरान्
पृथापुत्रे चापग्रथितसुमनोनीलमधुपे।
अधो मैनाकस्य स्थितवति समस्तं समभवद्
धनुष्कोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः॥

गेहे गेहे कति कति सदैः कान्तदेशेषु शय्याः
तत्सङ्गार्थं सुभग! न तथाकारि या योज्झितास्ताः।
स्थाने स्थाने कति कति न च ग्रन्थयः पद्मलाक्ष्याः
कर्पूरस्योज्ज्वलिकलिलतापत्रमुक्ता न मुक्ताः॥

लीलालीलाकलनकुशलः स्फीतपीताम्बरश्री-
र्लोकप्राणास्मृतवितरिता भासुराम्भोजघोषः।
उष्णं मुष्णन्नशुभमवनेस्तूर्णपूर्णाखिलाशः

CHATTAMPI SWAMI ARCHIVE

स्वप्ने दृष्टस्तरुणतुलसीभूषणो नीलमेघः ॥
शालग्रामोपरिविनिहितं श्यामलाङ्ग्याः कराब्जम्
वीक्ष्यैकस्याः समुचितवरं पूजया लब्धुमिच्छोः ।
एवं जाने मृदुभुजशिरश्चुम्बिताटङ्कलक्ष्म्याः
भृङ्गे पद्मं कमलमुकुले नालमस्मिन् मृणालम् ॥

रोहिण्याः सरुषः पदं नभसि तं नाप्नोति यत्पङ्कजं
भ्रान्त्या तत्र चिरं स्थितिं विदधतो भृङ्गातिभाग्यं तव ।
तत्पारम्परिकोऽपि मेऽस्तु विनयः प्रोच्येति रोमाञ्चितः
चन्द्रश्चुम्बति चञ्चरीकचरणं चञ्चच्चपेटाहतः ॥

कूजत्येष रसालशाखिशिखरे प्रोल्लासयन् कामिनी-
कान्तः कामिनिमानसं परभृतः को वा मुखं चुम्बति ।
नास्मिन् मासि मृगीदृशः कृशतनोस्त्वन्मानमङ्गीकृतम्,
दूरीकृत्य कुरु प्रसादमधुना प्राणेश्वरेऽनागसि ॥

तत्तुं पर्वतसन्निभेन कपिनाऽलाबूं कृतां वक्षसि,
क्षिप्रं वीक्ष्य निमज्जतीमथ नलसृष्टास्तरन्तीः शिलाः ।
लोको नृत्यपरं विभीषण-जनं प्रेक्ष्याह सेतूद्यमे,
तुम्बी मज्जति सन्तरन्ति दृषदः प्रेतो दिवा नृत्यति ॥

इन्द्रो मानुष-भावमेत्य पतगो भूत्वा भवत्यण्डजो
राजा रङ्कदशामुपेत्य कृमितां गत्वा द्रुमो जायते ।
खर्जूरः खदिरत्वमेत्य कदलीकाण्डे पुनर्लीयते,
संसारे बहु-जीव-योनि-गहने धिक् कर्मिणां चेष्टितम् ॥

उन्मीलद्बदकौमुदीकमबलावक्त्रं निदानं मुदाम्,
आलोलालकवल्लिभास्वदलिकम् प्रासं मुहुः पश्यताम् ।
केषां चेतसि जायते न तदिदं काकोल-कान्ति-च्छविम्,
राहुं चुम्बति चन्द्रमाः प्रतिदिनं मध्यन्दिनेऽधःस्थितः ॥

धाराङ्कुं किल तालकेश्वरमिता विद्येति या कीर्त्तिता,

CHATTAMPI SWAMI ARCHIVE

आकाशे वनिताश्चतुर्दशदशग्रीवास्त्रयोविंशतिः।
तत्रासन् गिरिशे प्रसीदुषि नखस्वस्सिन्धु-चन्द्रामल-
क्रोड़ेषु प्रतिबिम्बिताः सहजया मूर्त्त्या च लङ्कापतेः॥
विष्णोर्भक्तिवशाद्वहन्ति तरलस्थानेषु कण्ठ-स्रजाम्,
मत्स्यादींस्त्वदरातयो हृदि सदा हैम्ना विनिर्मायितान्।
गाढ़ालिङ्गनतो बभुः प्रतिमया सुव्यक्तरूपास्ततो,
देव ! त्वद्रिपु-कामिनी-कुच-तटे कृष्णावतारा दश॥
पृथ्वी चन्द्र-शुचि-प्रभामल-जलाऽऽवासः सुख-स्पर्शना-
भीष्ट-प्रापक-रत्न-भास्वदुभय-प्रान्ताच्छ-गुच्छावलिः।
एषा यैरवलोकिता सुकृतिभिर्जानामि पुण्येन तै-
रष्टौ धूर्जटिमूर्त्तयः स्तनतटे तन्वङ्गि ! दृष्टास्तव॥
गण्डप्रान्तगलन्मदाम्बुतटिनी-प्रौढ़प्रवाहाविलै-
र्दिग्-दन्तावलदन्त-कालिम-गुणैः श्यामीकृता वायवः।
मूर्त्तीभूय गजाधिरोहपदवीमभ्येत्य देवद्विषत्-
सेनायां बलि-दानवारिसमरे कालाग्निलीलां दधुः॥
दुग्धस्पर्द्धिभिरैन्दवैः समुदितध्वान्तेभपञ्चाननैः,
कृत्स्नेऽप्यंशुभिरन्तरे धवलिते द्यावापृथिव्योर्निशि।
धूम्राभं नयनाञ्जनालिक-लपत्सिन्दूर-पूरोद्भवम्,
काली-कज्जल-शोणिमा धवलयत्यर्द्धं नभोमण्डलम्॥
सेवाव्यग्रनवग्रहागततमोभीत्या शिरस्थापगा-
लोकप्रोल्लसदोर्ध्वया गिरिसुतापञ्चाननत्रासतः।
शीर्षार्द्धाङ्कगराश्रयात् पुररिपोरानन्दभाजोऽनिशम्,
चन्द्रश्चन्द्रमुखी मृगश्च युगपत् खेदप्रमोदौ दधुः॥
शम्भोस्ताण्डवडम्बरे तटभुवि प्रभ्रश्यतो मस्तकात्,
अम्भोधिः परमाणुमध्यमविशद् भीतो निशानायकात्।
सङ्गादस्य हि दूषितो मम समस्ता भूर्भवेदाप्लुता,

CHATTAMPI SWAMI ARCHIVE

तद्विघ्नोऽस्य भविष्यतीत्यवहितः सिद्धोदधानोऽष्टधा ॥
इन्दोर्बिम्बमिदं न कुम्भजमुनेस्तत्काशपुष्पोपमम्,
वर्षं तत्र कलङ्क एष तदिदं तस्यैव कृष्णाजिनम्।
अम्भोधिः परमाणुमध्यमविशद् भीतो निशानायकात्,
इत्याशङ्क्य पुनस्तथैव वद्धवि विज्ञाय तत्त्वं मुदा ॥
नित्यं सत्करपुष्कराश्रयपरो निर्नाशयन् कण्टकान्,
सङ्ग्रामे रिपुराजकुञ्जरघटादन्तावलीं पाटयन्।
श्रीहम्मीरमहीमहेन्द्र भवतस्तीक्ष्णोऽसिदण्डः स्फुटम्,
हेरम्बस्तरुणक्रमेलकगलस्पर्द्धी मृगाङ्कायते ॥
विघ्नव्रातसुतीक्ष्णकण्टकघटामास्वादयन् देहिनाम्,
हेरम्बस्तरुणक्रमेलकगलस्पर्द्धी मृगाङ्कायते।
दीप्यद्दन्तमरीचिवीचिनिचयज्योत्स्नाभिरुल्लासयन्,
कल्याणाम्बुनिधिं विपच्चकमलोल्लासञ्च विल्लासयन् ॥
मग्नान्यर्कपिपासुसप्ततुरगास्यान्तर्गतानि ध्रुवम्,
गङ्गायां गगनानि सप्त गगने गङ्गास्त्रयोविंशतिः।
किञ्चैकादशरुद्रमस्तकधृतास्तन्मौलिचन्द्रान्तरे,
तावत्यः प्रतिमागताः सुविशदा नैसर्गिकी चापरा ॥
यत्सप्तर्षिकमण्डलूदरगतान्यासन्निमग्नानि तद्,
गङ्गायां गगनानि सप्त गगने गङ्गास्त्रयोविंशतिः।
रुद्रैर्भक्तिवशंवदैरुपदशैः सूरैरुपैकादशैः,
पूज्यन्ते च पृथक् पृथक् बलिशतैरावाहनेऽपि स्थिताः ॥
कस्तूरीतिलकं विसारि विलसत् सीमन्तमुक्तामणिः
वक्त्रं निन्दितचन्द्रविम्बविभवं नीलञ्च कौशेयकम्।
चोलं जालकवाससां यदभवत्तन्नोपयूनामभूत्,
जम्बूवज्जलविन्दुवज्जलजवज्जम्बालवज्जालवत् ॥
ख्यातस्त्वं फलपुष्पवृष्टिसुमनः स्वाधीनजाम्बूनदः,

CHATTAMPI SWAMI ARCHIVE

क्षीणास्ते रिपुसम्पदः प्रतिदिनं मित्रोदये मोदसे ।
पान्थानां कुरुषे विलम्बनमहो ! दत्तान्तरस्तेजसाम्,
जम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्जालवत् ॥
नित्यं भात्यलकानुबन्धमधुरा भालस्थली सुभ्रुवः,
तारुण्यं विलसन्मदाविलमुरो नक्षत्रमालाश्रितम् ।
अङ्गं चम्पकगौरमक्षि सकलग्रामोल्लसन्मूर्च्छनम्,
गङ्गावद् गजगण्डवद् गगनवद् गाङ्गेयवद् गेयवत् ॥
कीर्त्तिस्ते विमला सदैव कमला भृङ्गैरियं सेव्यते,
शून्यं शत्रुकुलं तव क्षितिभृतो भेत्ता भवांश्छत्रितः ।
चारित्रं भरतानुयायि भवतो हम्मीर ! पृथ्वीपते !
गङ्गावद् गजगण्डवद् गगनवद् गाङ्गेयवद् गेयवद् ॥
बन्धं क्वापि कदापि चानुभवतो मोक्षश्च तन्मानसे,
तोषं वर्द्धयतः सदा सुमनसां नीचैः स्थितिं कुर्वतः ।
श्रीमत्पुष्पकवासलब्धयशसस्तस्मादनन्तर्हितः,
पानीयस्य दशाननस्य कबरीभारस्य तुल्यक्रमः ॥
पङ्क्व्योमविहारदक्षमसमश्रीनीलकण्ठाश्रयम्,
कृष्यामित्रसमं दया खलु महाकालं घनं कुर्वतः ।
सोत्कम्पानिमिषेक्ष्यमाणविलसत्सत्पुष्पकश्रीजुषः,
पानीयस्य दशाननस्य कबरीभारस्य तुल्यः क्रमः ॥
निःपीतो मुनिनार्णवश्चिरमभूत्पङ्कावशेषोऽभितः
शुष्कोरःस्थलतामवाप पवनप्रोद्धूतधूलीमयः ।
गङ्गे ! देवि ! भवत्प्रवाहकृपया भूयः प्रगीतो जनैः,
अम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥
इन्दुर्वारणरत्नमश्वतिलकः श्रीः पारिजातः सुधा
वर्गं स्वर्गपरिच्छदोऽयमजनि त्वत्तः सुरैः प्रार्थितात् ।
धिग् लोकं तव यस्तथापि तनुते तोयाङ्कनामावलीम्,

CHATTAMPI SWAMI ARCHIVE

अम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥

शय्या-सद्म हरेः श्रियो जनयिता रत्नाकरो नायकः,
तीर्थानामिति सागरस्य कथया नासौ तथा तुष्यति ।
अम्भोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः,
श्रुत्वैतानि पदानि तुष्यति यथा तर्षार्त्त-कण्ठो ज्वरी ॥

पाथोधेर्मन्थकाले सुरहृतममृतं लब्धमर्काब्जिजाभ्याम्
स्वर्भानुस्तायमानं कपट-पटु-शिवश्छिन्नमूर्द्धाऽच्युतेन ।
चक्रे सोमस्य वाक्यादिति भुवि लुठितं भर्त्तृशोकार्त्तचित्ताः,
श्लिष्यन्ति स्कन्दपत्न्यो विधुभयविधुरं राहुवक्त्रोऽधुनापि ॥

अस्मिन् पाथोधि-मन्थेऽमृत-हरण-रुषा शौरिणा भिन्नमौलि-
श्लिष्यन्ति स्कन्दपत्न्यो विधुभयविधुरं राहुवक्त्रोऽधुनापि ।
श्यामं शोकार्त्तनादास्तडिदमलरुचो मेघमाशङ्क्य तत् ते,
धत्ते नृत्यं मयूरः प्रमुदितहृदयः पातु वागित्युमायाः ॥

वस्त्राभावोऽनुबिम्बे नयनकमलयो राजयः कण्टकानाम्,
अस्ति स्तः सन्ति कान्ताकुचकलशतटे नास्ति नस्तो न सन्ति ।
चित्रं श्रीखण्डहारी प्रियतमकरजोज्जागरूक-व्रणानि,
त्वद्वैरि-क्ष्मापतीनामखिल वसुमतीकान्त-कान्तारमार्गे ॥

प्रत्येकं दिक्पतीशाऽनिलतपनवसून् सन्नतस्त्वं यथा भूः,
अश्रौषीस्त्वं यथा च स्वरसहितलसन् मूर्च्छना-ग्रामतालान् ।
कृष्णान्यस्तान्यमौलीक्षणवदवसरे सा च सा च प्रमादात्
शीर्षाणां सैव सङ्ख्या तव नवतिरभूल्लोचनानामशीतिः ॥

इति श्रीमहाकविदेवेश्वरविरचितायां
कविकल्पलतायामर्थाख्ये चतुर्थे स्तवके
समस्यानाम सप्तमं कुसुमम् ।

CHATTAMPI SWAMI ARCHIVE

अथ ग्रन्थकृद्विज्ञापनम् ।

न कवित्वाभिमानेन न कीर्त्तिप्रसरेच्छया ।
विहिताऽसौ मया किन्तु कौतुकात् कवितार्थिनाम् ॥
निष्फला लसतां त्यक्ता कविकल्पलता मम ।
एषा फलाय महते पोषणीया मनीषिभिः ॥
अन्यकन्यापि पुण्यार्थमपविद्धाऽपि धर्मदा ।
पोषणादेवमेषापि श्रेयसे च भविष्यति ॥

अथ ग्रन्थस्तुतिः ।

हन्त ! सन्ततमिमामुपास्यतः कस्य नश्यति न वाचि वाध्यता ?
उल्लसन्ति कलकण्ठकामिनो कूजितादपि च पूजिता गिरः ॥
कलकण्ठकलत्रकोमलस्वन-लक्ष्मीसहया सुकेलयः ।
कविकल्पलतानुकम्पया कविनः कस्य भवन्तु नोक्तयः ? ॥
निसर्ग-सारस्वतसम्भृतानि सूक्तानि मुक्तामणिकोमलानि ।
अवन्यमुख्या भजतां तदेषा द्वेषादुपेक्ष्या न विचक्षणेन ॥

स्वर्धेनुदुग्धसवयांसि वचांसि वाणी-
मञ्जीरमञ्जुलनिनादसहोदराणि ।
एतान्निषेव्य कवयः कवितामृतानि ।
विद्वत्सभासु स विलासमुदीरयध्वम् ॥
मदकलकलकण्ठीकेलिनादानुवादाः
परिणतसहकारास्वादसंवादभाजः ।
अभिनवमधुधाराबन्धवः काव्यबन्धा-
विधुतविधुरुचोऽस्याः सेवयाविर्भवन्ति ॥
सर्वं विनश्यति विहाय कवित्वमेकं
कायेन साकमिति कस्य नहि प्रसिद्धम् ।
एतद्विमृश्य कविकल्पलता सुकाव्य-
सम्पत्तये सुकविभिः सततं निषेव्या ॥

CHATTAMPI SWAMI ARCHIVE

आविष्कृता वसुमती बलयेश्वरेण,
देवेश्वरेण कविना कविनायकेन।
काव्यब्रह्मानसमुद्रे सकलार्थ-सूतिः,
सत्सूनगुच्छ 'कविकल्पलता' विभूयात्॥

इति श्रीमहाकविदेवेश्वरविरचिता कविकल्पलता
समाप्ता।

श्रीशप्रमाणेऽलिगते दिनेशे
शाकेऽनिलेन्द्रप्रमिते बुधाह्वे।
श्रीशप्रसादात् सुधियां मुदे मे।
संमुद्रितेयं प्रकटीकृता च॥

—:o:—

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE

CHATTAMPI SWAMI ARCHIVE